कार्तिकमासः
वर्षम् –६७
प्रथमोऽङ्कः
विक्रमाब्दः २०७२
युगाब्द ५११७
५ नवम्बर २०१५


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका


एकस्याः प्रतेः
१५/–
वार्षिक शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–





दीपोत्सवे महालक्ष्मीं गणेशं च सरस्वतीम् ।
सम्पूज्य प्रार्थयामोऽस्मै राष्ट्रायोत्कृष्टसम्पदः ॥

## विषय–सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ–संख्या |
|---|---|---|---|
| १. | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २. | मासावतरणम् | ,, ,, | ३ |
| ३. | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४. | पुरुषार्थचतुष्टये धर्मस्वरूपम् | सुरचना त्रिवेदी | ६ |
| ५. | वेदाः आश्रमाणां व्यवस्थापकाः | सरिता कुमारी | ८ |
| ६. | हुतात्मा बारहठः | परमानन्द शर्मा ''प्रमोद'' | १२ |
| ७. | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १३ |
| ८. | पतितपावनी – लोककल्याणकारिणी गङ्गा | प्रतिभा शर्मा | १४ |
| ९. | काव्यस्य प्रयोजनम् | राजेशकुमार शर्मा | १६ |
| १०. | पदयात्रायाः मार्गोऽप्यावरुद्धः | वेणीमाधव धर्माधिकारी | १७ |
| ११. | पुरातन–वेदान्तदर्शनम् | श्रीकृष्ण शर्मा | १८ |
| १२. | कादम्बर्याः भट्टमथुरानाथशास्त्रिरचित........ | हनुमानसहाय माली | २० |
| १३. | नव्याव्याकरणसारस्वतव्याकरणयोः....... | कानाराम जाटः | २२ |
| १४. | पत्रिका–समीक्षा | देवर्षि कलानाथशास्त्री | २३ |
| १५. | संस्कृतपत्रकारितामाध्यमेन संस्कृतस्य संरक्षणम् | ममता गुप्ता | २४ |
| १६. | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २६ |
| १७. | दीपावलीमहोत्सवः | अंजना शर्मा (व्याख्याता) | २८ |
| १८. | स्वातन्त्र्यपूर्व ब्रिटिश न्यायपालिकायाम्..... | डॉ. दिलीपकुमार नाथाणी | २९ |
| १९. | नारी–स्तम्भः | डा. राजेश्वरी भट्ट | ३० |
| २०. | आयुर्वेद स्तम्भः | प्रो. बनवारीलाल गौडः | ३२ |
| २१. | पंचाङ्ग | निदेशालयः, संस्कृत–शिक्षा, राजस्थानम् | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-689X

# भारती

संस्कृत-मासपत्रिकायाः





प्रमुखसंरक्षकाः
जगद्गुरवो निम्बार्कपीठाचार्याः श्री राधासर्वेश्वरशरणदेवाचार्याः,

प्रमुखसंरक्षकाः
जगद्गुरुशंकराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

प्रेरणास्रोतः
स्व. परमाचार्यः
श्री चन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्त केशव आप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामचद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पाकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी
डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठ संयोजन :
श्याम कम्प्यूटर्स, 22 गोदाम, जयपुर
rajeshksharma69@gmail.com 01414001974


## मङ्गलाचरणम्

वेधाविष्णुशिवादयोऽपि विबुधाः कुर्वन्ति यस्यार्चनम्
आद्याआद्यातरासाथातिकृपणाः प्रीणन्ति यां भूतये।
व्यापारोऽप्याखिलो मदीय कृपया प्रावर्तते भूतले
या सद्यः प्रददाति सौख्यमखिलं वन्दामहे तां श्रियम्।।

## मासावतरणम्

सूर्यस्योदयतः पुरैव महिलाः सुस्नान्ति वै बाहुले,
उद्वाहं रचयन्तिताः भगवतः विष्णोस्तुलस्या सह।
वर्धन्ते ननु रात्रयो लघुतरो घस्त्रश्च संजायते,
मासे कार्तिकिके स्त्रियों मधुरिपुं प्रीणानी गीतैस्तवैः।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

कार्तिकमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2072
नवम्बर, 2015
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अंक : 1

( राजस्थान संस्कृत अकादमी के आर्थिक सहयोग से प्रकाशित )

# सम्पादकीयम्

## पं. दीनदयाल उपाध्यायः

❑ पं. प्यारेमोहन शर्मा

भारते लोकतन्त्रसाफल्यं तदैव वास्तविकरूपेण भवितुं शक्नोति यदा राजनेतारस्त्यागशीला भवेयुः। पं. दीनदयाल उपाध्याय एतदर्थमस्माकमादर्शो विद्यते। महोदयानामेतेषां सम्पूर्णं जीवनं त्यागनिरभिमानतासरलताविनम्रता-देशभक्तिप्रभृतीनां मूर्तरूपमविद्यत। इमे वेशभूषया चिन्तनेन च पूर्णतो भारतीया आसन्। प्रायो नेतारः स्वदलं चिन्तयन्ति। देशस्य समृद्धिं संस्कृतिं नहि ते चिन्तयन्ति। यावच्च भारतीया संस्कृतिः सुरक्षिता न भविष्यति तावन्नैक-विकासकार्यैरपि समस्यानां समाधानं न भविष्यति।

अस्मिन् परिप्रेक्ष्ये श्री उपाध्यायाः महान्तश्चिन्तका अविद्यन्त। तेऽस्माकं समृद्धसंस्कृतेरात्मानुकूलं समस्यानां समाधानमचिन्तयन्। वस्तुतस्ते आधुनिका ऋषयोऽविद्यन्त। ते स्वकीयेनाचरणेन पूर्णचिन्तनेनाद्भुतां शिक्षां प्रायच्छन्। उक्तमपि "यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरो जनः, स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते।" साधनसम्पन्ने धनिनां कुले जनिमितो जनो यदि सफलतां प्राप्नोति तर्हि नहि तत् असामान्यं कार्यम्। परन्तु यदि चायविक्रेता साधारणो मोदीसदृशो जनः भारतस्य प्राधानमन्त्रिपदमलङ्कुर्यादिति वर्ततेऽसाधारणं साफल्यम्। स्वकर्मणा यः स्वदेशमेवाहर्निशं चिन्तयति नहि परिवारविषये चिन्तयति स एव पुरुष आदर्शो नेता विद्यते।

पं. दीनदयाल उपाध्याया मथुराजनपदस्यैकस्मिन् लघुतरे ग्रामे मध्यमवर्गपरिवारे जनिमलभन्त। त्रिवर्षात्मके वयसि पितृचरणा दिवं प्रयाताः। सप्तवर्षात्मके वयसि च जननी अपि भूलोकं विहाय दिवं गतवती। मातामह-गृहे प्रारंभिकी शिक्षा संजाता परन्तु दशवर्षात्मके वयस्येव मातामहोऽपि स्वर्लोकमगच्छत्। अस्मिन् विपत्काले लघुभ्राता शिवदयालोऽपि सहैवावसत्। अष्टादशवर्षात्मके वयसि शिवदयालोऽपि भ्रातरं दीनदयालं त्यक्त्वा परलोकमगच्छत्। परन्तु शैशवादेवात्मीयताविस्तारको दीनदयालः सर्वमसहत।

सत्सु महतीषु आपत्सु पं. दीनदयालः प्रतिभाबलेनाग्रे अवर्धत। माध्यमिकशिक्षामण्डलस्य अजयमेरुनगरस्य दशमकक्षायामसौ सर्वाधिकानङ्कानलभत प्रथमस्थानमलभत च। अनेन प्रसन्नः सीकरनगराधिपतिः अस्मै स्वर्णपदकं प्रायच्छत्-अग्रेऽध्ययनाय छात्रवृत्तिमप्यदात्। द्वादशीकक्षायाः परीक्षां बिरलाकालेजपिलानीतो ददौ तत्रापि सम्पूर्णमण्डले प्रथमं स्थानमलभत। तस्मिन् महाविद्यालये एतावता अङ्काः इतः पूर्वं नहि केनापि प्राप्ताः। अतः पुनः छात्रवृत्ति-मसावलभत। गणितविषयेण सह सनातनधर्म-कालेजात् प्रथमश्रेण्यां बी.ए. परीक्षामुदतरत्। ततश्च सेन्टजेम्स कालेजआगरातः आङ्लसाहित्ये एम.ए. प्रथमवर्ष परीक्षामुदतरत्। परन्तु तस्मिन्नेव समये मातुलस्य पुत्री (भगिनी) रुग्णा संजाता किञ्चित् कालानन्तरं दिवं प्रयाता च। अतोऽसावग्रे परीक्षां न अदात्। मातुलान्या आग्रहात् प्रशासनिकसेवाप्रतियोगितापरीक्षाप्रविष्टः प्रथम-श्रेण्यामुदतरच्च। परन्तु देश-सेवाभावनया नासौ प्रशासनिक-सेवामङ्गीचकार। ततश्च राष्ट्रीयस्वयंसेवकसंघस्य प्रचारको भूत्वा-आत्मानं राष्ट्रसेवायै समार्पिपत्।

विशिष्टप्रतिभासम्पन्नतया कार्यकुशलतया चाऽऽसौ त्रिभिर्वर्षैरेव सम्पूर्ण-उत्तरप्रदेशस्य सहप्रान्तप्रचारकत्वेन नियोजितः। पञ्चाशदधिकैकोनशततमे ख्रिष्टाब्दे (1950) यदा

भारतं शाश्वतिकीं भारतीयां चिन्तनधारां परित्यज्य ततः पृथक् जायते, इति दृष्ट्वा महानुभावोऽयं श्यामाप्रसादमुखर्जी-महोदयाय भारतीयादर्शाधारितं पृथक् राजनैतिकसंघटनं स्थापथितुं सहयोगं प्रदातुं सन्नद्धोऽजायत। ततोऽसौ लखनऊनगरे उत्तरप्रदेशस्य सम्मेलनमेकं प्रायोजयत्। सितम्बरमासस्यैकविंशतितमे दिनाङ्के 1957 वर्षे प्रादेशिकं जनसंघदलमघटयत्। ततश्च तस्मिन्नेव वर्षे दिल्लीसम्मेलने मुखर्जीमहोदयाः पं. दीनदयालमहोदयम् अखिलभारतीय-महामन्त्रिपदे न्ययोजयन्। सप्तषष्टिअधिकैकोनविंशति-ख्रिष्टाब्दपर्यन्तं सुदृढरूपेण राष्ट्रसंघटने संलग्नोऽजायत। ततश्च नैकशोऽध्यक्षपदाय प्रार्थितोऽपि नहि तत् पदं स्वीचकार। महानुभावोऽयं सदैव पदप्रतिष्ठात्मप्रचारादत्मानं पृथगेवा-रक्षत्। 1967 वर्षे केनापि कारणेन महतामनुरोधेन किञ्चित् कालं या-व-दसावध्यक्षपदमलञ्चकार। तेषां गतिशीलेनोज-स्विना व्यक्तित्वेन च दलकार्याणि द्रुतगत्या प्रावर्धन्त।

फरवरीमासस्य दशमदिनाङ्के कालीकटे तेषामध्यक्षतायां जनसंघस्य बृहदधिवेशनं सम्पन्नम्। ततो विश्वासोऽवर्धत यत् एतेषां सुयोग्यनेतृत्वे भाराताय स्वस्थो राजनैतिको विकल्पो मिलिष्यति। परन्तु दैवो नहि तत् स्वीचकार। फरवरीमासस्य दशमदिनाङ्के 1968 ख्रिष्टाब्दे लखनऊतः पटनागामिनि रेलयाने सहसा तेषामोजस्विराष्ट्रीयभावनाभिः ओतप्रोतं जीवनम् समाप्तिमगमत्। नेतृत्वे येषां गुणानामावश्यकता भवति ते गुणाः पं. दीनदयाल उपाध्याये पूर्णरूपेणाविद्यन्त। ते सततमेदिधिषन्त। ते सततमध्यगीषत। निरन्तरमचिचिन्तन् भारतीयदर्शनेतिहास-अर्थशास्त्राणि गाम्भीर्येणाध्यगीषत। राष्ट्रजीवनस्य विभिन्नपक्षेषु गहनं व्यापकं च चिन्तनं विधाय समये समये ये विचारास्ते प्रास्तुवन् तेऽत्यन्तं समयानुकूलाः शाश्वतसत्येन च प्राकाशिषत। ते नैकानि प्रेरणाप्रदानि पुस्ताकान्यलेखिषुः नैकानि पत्राणि कुशलतापूर्वकं समपीपदन्।

यं पन्थानं ते प्रादर्शयन् स्वजीवनेन विचारैश्च यः प्रकाशस्तम्भं स्थापितः स आगामिनि कालेऽस्मान् समुचिते मार्गे चालयिष्यति। प्रखरराष्ट्रवादी चिन्तकः पं. दीनदयाल उपाध्यायः राष्ट्रस्य सर्वतोन्मुखी-उत्कर्षाय तस्य मूलप्रकृते अनुरूपायाः नीतेः कार्यक्रमाणाञ्च निर्धारणे बलमयच्छन् ते पाश्चात्यानामन्धानुकरणस्य विरोधमकार्षुः। ते ऐच्छन् राष्ट्रियां स्वतन्त्रतामक्षुण्णां विधातुं देशस्यास्य विराट्स्वरूपं जागर्युः। राष्ट्रस्य जातीनां सामूहिका-शक्तिरेव ''विराट्'' वर्तते। उद्यमिनः शूरवीरा आर्य देशवासिनः संघटनं विना देशस्य रक्षां कर्तुमसमर्था एव जायन्ते अतः स्वराष्ट्रस्य स्वभावं संस्कृतिं च परिचिन्वन्तु। अत एव ते स्वकीय सम्पूर्णजीवनस्य-आधारमविचलभावञ्च भारतीयां संस्कृतिमेवामन्यन्त।

परन्तु ते विश्वस्य जगतः प्रतिष्ठामप्यपश्यन्। विश्वस्य प्रगतिं पश्यन्तु। प्राचीनपरम्परानिगडनमपि न वरम्। पश्चिमतः समागतं राष्ट्रवादं जनतन्त्रं समाजवादञ्च स्वराष्ट्रेऽपि स्वीकर्तुं ते सहयता अभूवन्। परन्तु पाश्चात्यानामेकाङ्गीपूर्णजीवनं विहाय समग्रदर्शनशैल्या जनतन्त्रात्मकं राष्ट्रं भवेदिति तेऽकथयन्। भारतीया संस्कृति-र्विद्रोहात्मिका नास्ति सा तु समन्वयात्मिका विद्यते। अतः सर्वसमन्वयकारि-परम्परानुकूलेन दृष्टिकोणेन स्वयमुन्नतिमवाप्य सम्पूर्ण-मानवताया उन्नतावनुकूला भवेम इत्येव भारतीयं जीवनदर्शनं विद्यते।

अतः स्वतन्त्रताप्राप्त्यनन्तरं भारते भारतीयां संस्कृतिं केवलं लालबहादुरशास्त्री अटलबिहारिवाजपेयी सदृशाः केचन एव नेतारः अपालयन्। सम्प्रति नरेन्द्रमोदीमहोदयः पुनः समग्रे विश्वे भारतीयां संस्कृतिं भारतीयदर्शनञ्च प्रसारयिष्यतीति विश्वसिमः। मोदी तेषु त्यागीपुरुषेषु विद्यते ये समग्रं जीवनं केवलं राष्ट्रकार्याय राष्ट्रहिताय च समर्पयन्ति।

अन्ते च- सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग् भवेत्।

# पुरूषार्थचतुष्टये धर्मस्वरूपम्

❑ सुरचना त्रिवेदी

भारतीयसंस्कृतेरपराधारभूता विशेषतास्ति जीवनस्य समग्ररूपेण ग्रहणम्। इयं संस्कृतिः खण्डदृग्भिः न परिचाल्यते। खण्डदृष्टिषु मानवस्य पक्षविशेषेऽत्यधिकं महत्त्वं प्रदीयते। येन च अन्ये पक्षा उपेक्षितास्तिष्ठन्ति। स्वसमग्रदृष्ट्या भारतीया संस्कृतिः मानवजीवनस्य समस्ता उपलब्धीः पुरुषार्थचतुष्टये संगृह्णाति। मानवजीवनविषये समग्ररूपेण विचार्य निर्धारितमस्ति यन्मानवो धर्मार्थकाम मोक्षात्मकान् चतुरः पुरुषार्थानभिलषति। सम्प्रति पुरुषार्थशब्दः साहसपूर्णकठिन-परिश्रमायापि प्रयुज्यते, किन्तु शब्दस्यास्य वास्तविकोऽर्थो विद्यते ''पुरुषैः अर्थ्यते'' इति पुरुषार्थः। अर्थात् यं प्रति पुरुषो भवति प्रयत्नवान् स एव पुरुषार्थः।

मानवजीवनस्य कर्त्तव्यस्य रङ्गभूमिस्तु ऐहिको लोकोऽस्ति। अत्रैव समागत्य मनुष्यः स्वमानवीयां भूमिकां विरचयति। मानवजीवनस्य सारगर्भितं लक्ष्यं पुरुषार्थ-चतुष्टयेनैव समन्वितं भवति। पुरुषार्थचतुष्टयस्य साधीयसी परम्परा अनादिकालत एव प्रचलन्ती वर्तते। पुरुषार्थः धर्मः अर्थः कामः मोक्षश्चेति चतुर्विधः। तत्र च बुद्ध्या धर्मः सम्बद्धोऽस्ति, शरीरेणार्थः, मनसा कामः आत्मना च मोक्षः। एतेषु एव चतुर्षु सर्वे मानवाः प्रवृत्ताः भवन्ति। एतैरेव चतुर्भिः सकलं जगज्जातं मानवजीवनं सम्पृक्तमस्ति।

स्व-स्वसंस्कारानुरूपं केचन धर्ममात्रेण केचन अर्थमात्रेण केचन काममात्रेण सन्तुष्टाः सन्तः मोक्षं यावदवगन्तुं न क्षमा भवन्ति, परन्तु तत्र एवंभूता अपि शूराः भवन्ति येषां मनो न रमते धर्मार्थकाममात्रेषु त्रिषु। ते संसारस्य असारतां विज्ञाय सर्वविधं सांसारिकं चमत्कारं विहाय च मोक्षात्मके चतुर्थपुरुषार्थे संलग्ना जायन्ते। पुरुषार्थचतुष्टय-विषये वेदा अपि एतेषां चतुर्णां महत्त्वं प्रतिपादयन्ति। वेदा हि विविधज्ञानविज्ञानराशयः, संस्कृतेराधाररूपाः, कर्त्तव्या-कर्त्तव्यबोधकाः, शुभाशुभनिर्देशकाः जीवनस्योन्नायकाः, विश्वहितसम्पादकाः चतुर्वर्गाप्तिसोपानस्वरूपाश्च सन्ति। एतेऽपि वेदाः पुरुषार्थचतुष्टयसेवने एव मानवजीवनस्य साफल्यं वर्णयन्ति। धर्मचिन्तायां कर्त्तव्यविचारणे च वेदाः परमप्रमाणभूताः सन्ति। उक्तं हि -

**''धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।'' मनु-2/3**
**अत्रैव मनुना प्रतिपादितं यथा -**
**''वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्।।''**
**मनु. 2/17**

अर्थविषये यजुर्वेदस्य वाक्यं ध्येयमस्ति। तत्रोक्तं यथा-

**''देहि मे ददामि ते नि मे धेहि नि ते दधे।**
**निहारं च हरासि मे निहारं निहराणि ते।।''**
यजु. 3/50

एवं द्वितीयपुरुषार्थस्यार्थस्य विषये यजुर्वेदः संकेतयति। अनेन यज्ञदानादीनां सर्वेषां च संकेतोऽवगन्तव्यः। अर्थ-तुलनायां काम आन्तरिकः। स्त्रीपुरुषयोः सम्बन्ध एव न कामः। सौन्दर्यप्रतिबोधिकाकामना कामः। अतएव साहित्य-सङ्गीतनृत्यनाट्यचित्रमूर्तिस्थापत्यादयः सर्वाः कलाः कामरूपपुरुषार्थे समागच्छन्ति। कामो मनसि संतिष्ठते। मोक्ष आत्मनः सहजं स्वरूपमस्ति।

एवं हि पुरुषार्थचतुष्टयमेव जीवनस्य लक्ष्यत्वे निर्धार्यते। एकेनापि अङ्गेन हीनं पुरुषार्थचतुष्टयं न हि जीवनोद्देश्यपूर्तये प्रभवति सति जीवने निरोगे, सति शरीरे स्वस्थे, हृष्टे-पुष्टे च, सति च मानसिकविकासे मानवस्य सर्वोऽप्यभिलाषः, सर्वा महत्त्वाकांक्षाः, सर्वमप्यभीष्टं सुकरेणैव सिध्यति एवम् आरोग्यं साफल्यं च पुरुषार्थचतुष्टये मूलकारणं भवति। तद् विना किञ्चिदपि न संभाव्यते।

अत्र इदं तथ्यं विचारणीयं यत् पुरुषार्थचतुष्टये धर्मस्य प्राथम्यं प्राधान्यञ्चास्ति। केनापि विशिष्टप्रयोजनेन ऋषयो धर्माय प्रथमं स्थानं प्रायच्छन्निति। यतोहि अधर्मेणार्जितं वित्तं न केवलमचिरेण विनश्यति अपितु जनयति महान्तमनर्थमपि। उक्तञ्च मनुना –

**''अधर्मेणैधते तावत् ततो भद्राणि पश्यति।**
**ततः सपत्नान् जयति समूलं तु विनश्यति।।''**अतएव

धर्मानुस्यूतोऽर्थः धर्मार्थानुस्यूतः कामश्च प्रशस्यते। मानवेन सह धर्मस्य सम्बन्धः आभ्यन्तरो बाह्यश्चेति द्विविधः। स्वकीयजीवने मानवेन प्राणिभिः सह कथं वर्तितव्यम्? स्वजीविका च कथं चालनीया इत्यादिविषयाणां शिक्षां ददाति धर्मः। लोकं प्रति परलोकं च प्रति कर्त्तव्यपालनं तथा जीवनमानन्दयुतं कथं स्यादित्यपि शिक्षयति धर्मः। अतएव महर्षिणा कणादेन एवमकारि धर्मलक्षणम् –

**''यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।''**

महर्षिः व्यासः प्रावोचत् –

**''अन्तःकरणस्य शुद्धिसाधक एव धर्मः।''**

अयं मानसमलम् अपगमयति चित्तं प्रसादयति लोकं प्रीणयति, सदाचारं वर्धयति कदाचारं निराकरोति। अयमेव विभनक्ति मानवान् पशुभ्यः। अयमेव चैतन्यमुद्बोधयति। अतो धर्मस्य महत्त्वमपाकर्त्तुं न शक्यते। अर्थकामयोस्तु प्राधान्यं केवलं जडवादिनां भौतिकवादिनां कृते एव वर्तते। अध्यात्मदृशा तु प्रत्येकमवस्थायां धर्मस्यानुष्ठानमत्यावश्यकम् अभिमतम्। हितोपदेशेऽपि व्यलेखि विष्णुशर्मणा –

**''अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्।**
**गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।।''**

यद्यपि सुखमानन्दो वा सर्वेषामभीप्सितः। अर्थमुपलभ्य सेवनीयः काम इति वदन्ति बहवः किन्तु अर्थमूलकमेव सुखमिति भ्रान्तिरेव। चाणक्येनोक्तम्–''सुखस्य मूलं धर्मः।'' तात्पर्यमिदं यत् धर्माचरणपुरःसरं विधेयमर्थोपार्जनं सेवनञ्च।

महर्षिवाल्मीकिरपि एतदेव प्रतिपादयति –

**''धर्मादर्थः प्रभवति धर्मात् प्रभवति सुखम्।**
**धर्मेण लभते सर्वं धर्मसारमिदं जगत्।।''**

अरण्य 1/30

महर्षिव्यासेनोक्तं –

**''धर्मे वर्धति वर्धन्ते सर्वभूतानि सर्वदा।**
**धर्मे ह्रसति हीयन्ते तस्माद् धर्मं न लोपयेत्।।''**

वस्तुतः धर्मं विना सुखस्य कल्पना गगनकुसुमायमाना एव वर्तते। अतो धर्ममपहाय अर्थकामयोः सेवनं न केवलमनुपयुक्तमत्र अपितु असम्भवमपि वर्तते। मनुस्तु धर्मरहितयोरर्थमकामयोः वर्जनमेव प्रतिपादयति –

**''परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ।''**

धर्मविहाय

अर्थकामपरायणता तु केवलमनिष्टायैव प्रकल्पते। सर्वे श्रेष्ठप्राणिनो मनुष्यस्य नेदं लक्ष्यं जीवनस्य यदसौ केवलं कामनामेव पूरयेत् अर्थद्वारा अपितु तत्त्वविद्यया, भक्तिभावनया वा साक्षात्कुर्यात् आत्मतत्त्वम्। इदं शरीरं पञ्च–ज्ञानेन्द्रियैः पञ्चकर्मेन्द्रियैश्च संयुतमस्ति। अत्रैव मनो–बुद्ध्यादिरूपाणामन्तःकरणानामपि सन्निवेशः अस्यां स्थितौ मनसः शिवसंकल्पकत्वं विधाय धर्मार्थकामाः सेवनीया। एवं त्रिषु धर्मयुक्तं अर्थकामेषु यथा-शास्त्रं च सततं सेवनाद् उपरामो भवति तदैव मोक्षावसरः समागच्छति। सदसतोः पार्थक्य बोधके विवेके धर्मस्तिष्ठति। असतं विहाय सतं गृहीतुं प्रेरयति धर्मः। अर्थकामाभ्यां पूर्वं धर्मरूपपुरुषार्थस्य परिगणनाया अयमेवाभिप्रायोऽस्ति यद् वयं सदुपायैरर्थकामौ साधयामः नत्वसदुपायैः। मोक्ष आत्मनः सहजं स्वरूपमस्ति। अज्ञानावरणमपाकृत्यापरोक्षरूपेण मोक्षमनुभवितुं शक्नुमः।

प्रवक्ता–संस्कृत
भ. आर्यकन्या स्नातकोत्तर महाविद्यालय
लखीमपुर–खीरी

# वेदाः आश्रमाणां व्यवस्थापकाः

❑ सरिता कुमारी

**यतो यतः समीहसे ततो नो अभयङ्कुरु।**
**शन्नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः।।**

यजु. अ. 36, अनु. 17, मं. 22

सर्वेभ्योऽभयम् अर्थात् सर्वेषां कृते सर्वस्मात् च। मनुष्याणां भयं कस्मात् ? मुख्यरूपेण मनुष्यादेव। अतः मनुष्याणां सर्वकल्याणकारिणी अभयप्रदायिनी व्यवस्था एव समाज इति कथ्यते।

समाजः मनुष्याणां समुदायस्य कृते प्रयुज्यते, मनुष्येतरप्राणिनां समूहस्तु समजः इति कथ्यते। यथोक्तं काशिकायाम्-

**समुदोरजः पशुषु - समजः पशूनाम्। समुदाय इत्यर्थः। पशुषु इति किम्? समाजो ब्राह्मणानाम्।। काशिका 3.2.69**

वेददृष्ट्या सर्वे मनुष्याः परस्परं मित्रवत् (सखावत्) सन्ति तथा तेषु मित्रतायाः भावः भवेत् न केवलं मनुष्यान् प्रति अपितु समस्तप्राणिमात्रं प्रति। अत एव उक्तं यजुर्वेदे -

**दृते दृंह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा समीक्षामहे।। यजुर्वेद अ.36, मन्त्र 18**

वैदिकी सामाजिक-सांस्कृतिकव्यवस्था मानवीयेतिहासे उत्कृष्टतमा आसीत् या ईश्वरीयसिद्धान्ताधारिता निर्दिष्टा च आसीत्। मनुष्यस्य सुखं, शान्तिः समृद्धिश्च सर्वे सामाजिकधर्मसम्बद्धाः सन्ति। सामाजिकं सौख्यं शान्तिश्चैव मनुष्यस्य वैयक्तिकं सौख्यं शान्तिश्च। एषा एव संस्कृतिः, यस्यां जीवन् मानवः निरन्तरं कल्याणपथि अग्रेसरोऽभवत्, बीजरूपं पारस्परिकसौहार्दं सामाजिकसमरसता च विकसितवृक्षरूपे विकसितवती अस्यामेव जीवन् मानवः धमार्थकाममोक्षरूपं पुरुषार्थचतुष्टयं सम्प्राप्य जीवनस्य पूर्णत्वम् अधिगतवान्। वैदिकसमाजव्यवस्थायाः प्रमुखधारा आसीत् वर्णाश्रमव्यवस्था। वर्णाश्रमव्यवस्थायामेव सर्वेषां प्राणिनां सर्वे कर्तव्याधिकाराः वर्णिताः। वर्णव्यवस्थया अनुशासितस्वतन्त्रसमाजस्य राष्ट्रस्य च स्वरूपरक्षायै आवश्यकमस्ति यत् तस्य राष्ट्रस्य जनाः पूर्णतया प्रतिष्ठिताः सर्वप्रकारेण च विकसिताः स्युः। अप्रतिष्ठित-अयोग्य-मर्यादाहीन-जनानां समष्टिः कदापि समाज-सापेक्षवर्णधर्मस्य पालनं कर्तुं न शक्नोति। अत एव वैदिककालीनमहर्षिभिः समाजस्य स्वरूपरक्षायै वर्णव्यवस्थया सह व्यक्तेः स्वरूपरक्षायै आश्रमव्यवस्थायाः निर्माणं निर्धारणं च कृतम्।

वर्णविभागः एकः महायज्ञः अस्ति एवञ्च समस्तं राष्ट्रम् अनेन सम्बद्धम् अस्ति। वर्णव्यवस्था न तु एकेकैन पृथग्रूपेण साध्या, एतस्मादेव अस्याः सङ्घटनाय कर्तारः चतुर्षु विभागेषु विभक्ताः, किन्तु आश्रमव्यवस्था व्यक्तिसम्बद्धाऽस्ति। एवं प्रत्येकं व्यक्तेः जीवने चत्वारि स्वतन्त्रकर्माणि सन्ति। परन्तु एतेषां चतुर्णाम् उद्देश्यानि भिन्नानि, अत एतेषां सममेव अवस्थितिः असम्भवा। अत एव व्यक्तिगत-आत्मशक्तीनां विकासाय मानवः यदनुष्ठानं करोति, तस्य चतुर्षु भागेषु विभाजनं कृत्वा स्वजीवनकाले एव क्रमशः चतुर्णामेव शक्तीनां विकासं करोति, अर्थात् एक एव जनः स्वजीवने समयानुसारं चतुर्णामेव आश्रमाणां पालनं करोति।

जाबालोपनिषदि अपि उक्तमस्ति -

**स होवाच याज्ञवल्क्यः- ब्रह्मचर्यं समाप्य गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्।।**

ऋषिदयानन्देन स्वऋग्वेदादिभाष्यभूमिकायाम्

आश्रमाणां विषये लिखितमस्ति –

आश्रमा: अपि चत्वार: सन्ति– ब्रह्मचर्यगृहस्थवान–प्रस्थसंन्यासभेदात्। ब्रह्मचर्येण सद्विद्या शिक्षा च ग्राह्या। गृहाश्रमेणोत्तमाचरणानां श्रेष्ठानां पदार्थानां चोन्नति: कार्या। वानप्रस्थेनैकान्तसेवनं ब्रह्मोपासनं विद्याफलविचारणादि च कार्यम्। संन्यासेन परब्रह्ममोक्षपरमानन्दप्रापणं क्रियते, सदुपदेशेन सर्वस्मै आनन्ददानं चेत्यादि, चतुर्भिराश्रमैर्धर्म–काममोक्षाणां सम्यक् सिद्धि: सम्पादनीया।

ब्रह्मचर्याश्रम:– ऋग्वेदे दशममण्डले ब्रह्मचर्याश्रमस्य महिमा वर्णितोऽस्ति। तथा–

**ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम्।**
**तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं न देवाः।।**

ऋग्वेदस्य पर्यालोचनेन ज्ञायते यत् सर्वै: ब्रह्मचर्याश्रम: अपरिहार्यत्वेन परिपालनीयोऽस्ति। गृहस्थादयस्तु त्रय: आश्रमा: ऐच्छिका एव आसन्। ऋग्वेदे ब्रह्मचर्याश्रमे ब्रह्मचारिण: सद्विद्यासुशिक्षादीनां शुभगुणानां सम्यक्प्रकारेण ग्रहणं कुर्वन्ति। ब्रह्मचर्याश्रमस्य विधिविधानानां विषये अथर्ववेदेऽपि उक्तमस्ति–

**आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।**
**तं रात्रीस्तिस्र उदरे बिभर्त्ति तं जातं द्रष्टुमभिसंयन्ति देवाः।।**
**इयं समित्पृथिवी द्यौर्द्वितीतान्तरिक्षं समिधा पृणाति।**
**ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस्तपसा पिपर्त्ति।।**
**पूर्वो जातो ब्रह्मणो ब्रह्मचारी धर्मं वसानस्तपसोदतिष्ठत्।**
**तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम्।।**

अथर्व का. 11, अनु. 3, मं. 3–5

अर्थात् गर्भे स्थित्वा मातृपित्रो: संयोगेन यत् जन्म भवति, तत् मनुष्यस्य प्रथमं जन्म इति। द्वितीयं जन्म भवति यदा आचार्य: पिता विद्या च माता भवत:। अस्य जन्मन: अभावे मनुष्य: मनुष्यत्वहीन: भवति। बालक: बालिका वा अष्टमे वर्षे पाठशालां प्रविश्य आचार्यसमीपं गत्वा ब्रह्मचारी ब्रह्मचारिणी वा भवति। आचार्य: त्रिरात्रिपर्यन्तं तं गर्भे संरक्ष्य आरम्भिकं ईश्वरोपासना–धर्म–पारस्परिकविद्याऽध्ययना–दिकं ज्ञानं प्रददाति। य: ब्रह्मचारी पूर्णतया सम्पठ्य अध्ययनं करोति, स: पुरुषार्थी भूत्वा सर्वेषां मनुष्याणां कल्याणं करोति।

ब्रह्मचारी ज्ञानप्रकाशयुक्त:, तपस्वी, दीर्घश्मश्रुधारी, प्राण–लोक–परमेश्वरादिसम्बद्धविद्यानां जिज्ञासु:, अविद्यायाश्छेदको भवति। यथा सूर्य: परमेश्वरस्य नियमेषु संस्थित्य समस्तलोकान् प्रकाशयति तथैव मनुष्य: ज्ञानवान् भवति। ब्रह्मचारी प्रतिदिनं सन्ध्योपासनां, स्नानम्, आचमनं, प्राणायामं, अग्निहोत्रादीनि सम्पादयन् पवित्रं सात्त्विकं च आहारविहारं कुर्वन् अध्ययनं कुर्यात्। ब्रह्मचर्यं त्रिविधं भवति–

1. कनिष्ठब्रह्मचर्यं – 24 वर्षपर्यन्तम् 2. मध्यमब्रह्मचर्यं – 44 वर्षपर्यन्तम् 3. उत्तमब्रह्मचर्य – 48 वर्षपर्यन्तम्

ब्रह्मचर्याश्रम: ब्रह्मदानत्वाद् अन्याश्रमेभ्यो विशिष्यते, अत एव उक्तम् –

**सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते।**
**वार्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषाम्।। मनुस्मृतिः**

अत एव यावच्छक्यं तावत् तन–मन:–धनै: विद्याया: वृद्धि: करणीया। यस्मिन् देशे यथायोग्यं ब्रह्मचर्य–विद्या–वेदोक्तधर्मादीनां प्रचार: भवति, असावेव देश: सौभाग्यवान् भवति।

गृहस्थाश्रम: – मनुमतेन य: अक्षटयस्वर्गस्य कामनां करोति, स: प्रयत्नपूर्वकं गृहस्थाश्रमस्य पालनं कुर्यात्। महाभारतेऽपि गृहस्थाश्रमस्य उत्कर्षं प्रतिपादयन् उक्तम् यत् यथा मातरम् आश्रित्य सर्वे प्राणिन: जीवन्ति तथैव गृहस्थाश्रममाश्रित्य सर्वे आश्रमा:।

**यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः।**
**एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः।।**

गृहस्थाश्रमस्य विधिविषये यजुर्वेदे उक्तमस्ति-

**यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये।
यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा।।
देहि मे ददामि ते नि मे धेहि नि ते दधे।
निहारं च हरासि मे निहारं निहराणि ते स्वाहा।।
गृहा मे बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि।
ऊर्जं बिभ्रद्वः सुमनाः समेधा गृहानैमि मनसा मोदमानः।।
येषामध्येति प्रवसन्येषु सौमनसो बहुः।
गृहानुपह्वयामहे ते नो जानन्तु जानतः।।
उपहूता इह गाव उपहूता अजावयः।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः।।
क्षेमाय वः शान्त्यै प्रपद्ये शिवं शग्मं शंयोः शंयोः।।**

यजु. अ. 3, अनु. 3, मं. 45, 50, 41-43

सामाजिकनियमेषु स्थित्वा सत्यव्यवहारपूर्वकम् आदानप्रदानं कथनोपकथनं करणीयम्। अर्थात् कथमपि मिथ्याव्यवहारः न करणीयः। गृहस्थिनः निम्नप्रमुखकर्तव्याणि अपि भवन्ति-

पुरुषार्थचतुष्टयस्य प्राप्तिः, ऋणत्रयात् मुक्तिः, महायज्ञानां सम्पादनम्, पारिवारिकसौमनस्यम्, मानवीयजीवनदर्शनस्य उपलब्धिः, वैयक्तिकोत्थानम्, सर्वाङ्गीणव्यक्तित्वस्य निर्माणम्, भौतिकसुखापेक्षया आध्यात्मिकसुखस्य श्रेष्ठत्वप्रतिपादनम् इत्यादयः।

विवाहसंस्कारानन्तरं स्नातकाः गृहस्थाः भवति। गृहस्थाश्रमः विविधप्रकारकैः उत्तरदायित्वैः युक्तमस्ति। पञ्चमहायज्ञानाम् अनुष्ठानं तेषां मुख्यकर्तव्यमस्ति। उक्तञ्च वशिष्ठेन-

**यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम्।
एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्।।**

वानप्रस्थाश्रमः- ब्रह्मचर्यं गृहस्थं च पूर्णं कृत्वा वानप्रस्थस्य दीक्षा प्राप्तव्या। मोक्षप्राप्तिः मानवजीवनस्य चरमलक्ष्यम्। वानप्रस्थे च मानवः मोक्षाभिमुखी भवितुं प्रयतते। नियमानुष्ठाने, त्यागे तपस्यायां च क्रमशः वृद्धिं कुर्वन्तः संन्यासाश्रमधारणस्य योग्यतां लभन्ते। मनुस्मृतौ अपि उक्तमस्ति-

**एवं गृहस्थाश्रमे स्थित्वा विधिवत्स्नातको द्विजः।
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः।।
गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदाऽरण्यं समाश्रयेत्।।
सन्त्यज्य ग्राम्यमाहारं सर्वञ्चैव परिच्छदम्।
पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव च।।**

मनुस्मृतिः 6. 1-3

वानप्रस्थाश्रमे निवसन् सः निःस्वार्थभावेन विभिन्नशास्त्राणां स्वाध्यायं कुर्यात्, शिष्येभ्यः विद्यादानं कुर्वन् सामाजिकाभ्यु-दयाय प्रयतेत। अत एव उक्तं छान्दोग्योपनिषदि-

**त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचर्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मा-नमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्ति।।**

छान्दोग्योपनिषद् प्र. 2, खण्ड 23 (प्रवाक 1)

वानप्रस्थाश्रमे धर्मस्य त्रयः स्कन्धाः भवन्ति-प्रथमः विद्याध्ययनम्, द्वितीयः यज्ञः (उत्तमक्रियासम्पादनम्), तृतीयश्च विद्यादीनाम् उत्तमगुणानां दानम् इति। एवमेव त्रीणि तपांसि भवन्ति- प्रथमं तपः वेदोक्तधर्मानुष्ठानपूर्वकं विद्याप्रदानम्, द्वितीयं तपः आचार्यकुले वसन् विद्याध्ययनम् तृतीयं च परमेश्वरस्य सम्यक्प्रकारेण विचारं कुर्वन् समस्तविद्यानां ज्ञानप्रापणम्। मुण्डकोपनिषदि अपि वानप्रस्थाश्रमस्य संयतजीवनविषये उक्तमस्ति-

**तपः श्रद्धे ये ह्युपवसन्त्यरण्ये, शान्ता विद्वांसौ भैक्षचर्यां चरन्तः। सूर्यद्वारेण तं विरजाः प्रयान्ति, यत्राऽमृतः सपुरुषो ह्यव्ययात्मा।। मुण्डकोपनिषद् 2.11**

अर्थात् भिक्षावृत्तिम् आश्रित्य यः विद्वान् शान्तस्वभावः वानप्रस्थः सन् अरण्ये निवसन् तपः श्रद्धां च सेवते पुण्य-पापेभ्यः मुक्तः भूत्वा उत्तरायणपथि अमृताव्ययपुरुषस्य लोकं (ब्रह्मलोकं) गच्छति।

**संन्यासाश्रमः**- संन्यासाश्रमः जीवनस्य अन्तिमाश्रमः। वानप्रस्थस्य सहजपरिणतिरेव संन्यासाश्रम इत्युच्यते। संन्यासाश्रमः अन्तिमाश्रमः। व्यक्तिः संन्यासाश्रमे भौतिकविषयान् सर्वथा विहाय परब्रह्मणि रतिं करोति। एवञ्च सर्वविधकर्तव्याणि कुर्वन् पुरुषार्थचतुष्टयं च सम्प्राप्नुवन् एकं सर्वाङ्गीणजीवनं यापयति अत एव उक्तम्-

**वनेषु च विहृत्यैव तृतीयं भागमायुषः। चतुर्थमायुषो भागं त्यक्त्वा संगं परिव्रजेत्।। मनु. 6.23**

**गीतायामपि श्रीकृष्णमुखेन वेदव्यासः कथयति- काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः। 18.25**

संन्यासाश्रमे प्रविशन् संन्यासी प्रतिज्ञां करोति यत् अद्य अहं पुत्र-धन-यशोविषयिकां सर्वां कामनां परित्यजामि सर्वे च मत्तः अभयं प्राप्नुवन्ति। अत एव उक्तम्- **पुत्रैषणा वित्तैषणा लोकैषणा या परित्यक्ता मत्तः सर्वेभ्यो-ऽभयमस्तु।**

एतादृशं पवित्रं सर्वजनहिताय व्रतं संधार्य विश्वस्य कल्याणकामनां च लक्षयित्वा देश-देशान्तरेषु संन्यासिनः भ्रमणं कुर्वन्ति, उपदिशन्ति, अहिंसा-शान्त्योः प्रसारेण सह भारतीयज्ञानं सर्वेभ्यः जनमानसेभ्यः प्रददति एवञ्च प्राप्नुवन्ति विश्वगुरुपदम्। एते एव संन्यासिनः अग्रजन्मानः इति कथ्यन्ते, एतानेव संलक्ष्य मनुः अलिखत्-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः। मनुस्मृतिः**

संन्यासाश्रमः निवृत्तेः पूर्णचरितार्थता अस्ति। व्रतस्य प्रारम्भः ब्रह्मचर्याश्रमे अभवत् तस्य एषा व्यवस्था अत्यन्तम् उदारशीला वैज्ञानिकसिद्धान्ताधारिता च अस्ति। अनया व्यवस्थया एकतः तु मनुष्यस्य शारीरिक-आध्यात्मिक-बौद्धिक-मानसिकक्षमतानां पूर्णविकासः भवति, द्वितीयतः तस्य बाह्यान्तरिकेन्द्रियाणां बुद्धेश्च पूर्णतृप्तिः भवति। अनेन राष्ट्रस्य न केवलं वैयक्तिकः अपितु समष्टिगतः विकासः बाधारहितः सामञ्जस्यपूर्णः च भवति। एते चत्वारः आश्रमाः प्राचीनभारतस्य जीवनदायी आत्मा अस्ति।

**प्रथमे ब्रह्मचर्याश्रमे** प्रयासः क्रियते यत् ब्रह्मचारी स्वदेशस्य सांस्कृतिक-आत्मिकपरम्पराणां विषये स्वसामर्थ्यानुसारं पूर्णज्ञानं प्राप्नुयात्। अनेन व्यक्तेः शिक्षया दीक्षया च देशस्य सांस्कृतिकनिधिः अबाधगत्या प्रवहति। आश्रमेऽस्मिन् मनुष्यः ज्ञानोपार्जनं करोति। अस्मिन् आश्रमे समाजस्य परमं दायित्वमस्ति यत् सः ब्रह्मचारिणां समस्तसुविधानां आवश्यकतानां च पूर्णं भारं वहेत्।

**द्वितीये गृहस्थाश्रमे** व्यक्तिः स्व आर्थिक-जीवोत्पत्तिसम्बन्धि-आवश्यकतानां प्रवृत्तीनां च सन्तोषणाय प्रयतते सर्वेभ्यः गृहस्थेभ्यः अपेक्ष्यते यत् ते आर्थिकक्षेत्रे स्वदायित्वानां निर्वाहं कुर्वन्तः समाजस्य ऋणेभ्यः मुक्ता भवेयुः वंशपरम्पराञ्च सन्तानोत्पत्तिद्वारा अविच्छिन्नां कुर्युः।

**तृतीये वानप्रस्थाश्रमे** आशा क्रियते यत् वानप्रस्थिनः स्वार्थं रागद्वेषं च परित्यज्य निरन्तरं मनन-चिन्तनं कुर्वन्तः दार्शनिकानुभवेषु समृद्धा भवेयुः।

**चतुर्थे संन्यासाश्रमे** व्यक्तिः अनन्तस्य अन्वेषणे जीवनं यापयन् आत्मबोधं प्राप्नोति भारते एषा धार्मिकमान्यता विश्वासः च यत् एतेषां चतुर्णाम् आश्रमाणां सम्यक्तया नियमपूर्वकं पालनेन मनुष्यः निश्चयेन मोक्षं प्राप्नोति।

शोधछात्रा, राज. वि., जयपुर

# ।। हुतात्मा बारहठः ।।

-परमानन्द शर्मा ''प्रमोद''

स्वाधीनताप्राप्तये यथाकालमान्दोलनानि समुद्भूतानि। बहवो वीरा वीराङ्गनाश्च स्वतन्त्रतायज्ञवेद्यां स्वप्राणान् हुतवन्तः तेषु राजस्थानराज्ये भीलवाड़ाजनपदे शाहपुरा नगरस्य बारहठकुटुम्बस्य विहङ्गमपरिचयोऽवधेयः।

## ठाकुरकेसरीसिंहबारहठः

स्वप्राणानपि अगणयन् समग्रं कुटुम्बं स्वाधीनतायै समर्पितवतः स्वनामधन्यस्य ठाकुरकेसरीसिंहबारहठस्य जन्म शाहपुरानगरस्य समीपस्थे देवखेडा (देवपुरा) नाम ग्रामे 21 नवम्बर 1872 तमे ख्रिस्ताब्दे अभवत्। तस्य पितुर्नाम ठाकुरकृष्णसिंहबारहठः आसीत्। जन्मनः मासाभ्यन्तरे एव केसरीसिंहस्य माता दिवंगता जाता। अत एवास्य परिपालनं पितामही कृतवती। कार्यवशात् ठाकुरकृष्णसिंहः उदयपुरमागतवान्। महाराणा फतहसिंहस्य परमानुग्रहेण तेन तत्रैव वासस्य निश्चयः कृतः। अतः शैशवावस्थायामेव बालकः केसरीसिंहोऽप्युदयपुरमागतवान्। एतस्याध्ययनमुदयपुरे संजातम्।

केसरीसिंहः पाली-प्राकृत-राजस्थानी-बंग्ला-मराठी-गुजराती-प्रभृतिभिः भाषाभिः सहेतिहासं दर्शनशास्त्रं मनोविज्ञानं खगोलशास्त्रं ज्योतिषशास्त्रञ्च सम्यगधीतवान्। बनारसस्य गोपीनाथनाम्नः संस्कृतविदुषः संस्कृतं श्रद्धया अधीतवान् सः। राजनीतिविषये इटलीदेशस्य राष्ट्रनायकं मेजिनीं गुरुरूपेण स्वीकृतवान् सः।

केसरीसिंहस्य अष्टादशे वयसि देवीदानस्य भगिन्या माणिककुमार्या (माणिककँवर) सह विवाहोऽभवत्। स्वबुद्धिकौशलेन स युवावस्थायामेवोदयपुरस्य महाराणा-फतहसिंहस्य सचिवोऽभवत्। ततः कोटामहारावलस्य विनम्राग्रहेण सः तस्य राजसभामप्यलङ्करोत्।

1857 ख्रिस्ताब्दस्य सशस्त्रक्रान्त्याः विफलत्वात् समग्रे राष्ट्रे नैराश्यान्धतमः प्रसृतम्। सर्वत्र स्वाधीनतायाः भावना लुप्तप्राया जाता। नेतारः संन्यासिनां व्रतं धृत्वा जनजागरणं कुर्वन्त आसन्। कार्यं साधयेयं देहं वा पातयेयमिति भावनया अनेके वीरव्रतिनो योद्धारः कार्यं विदधतिस्म तदा तत्कालीनो वायसरायो लार्डकर्जनः स्वकूटनीत्यनुसारेण सम्राट् एडवर्ड् सप्तमस्य राज्यारोहणावसरे सर्वान् भारतीयभूपान् आहूतवान्। मेवाडस्य महाराणा फतहसिंहोऽनिच्छन्नपि तस्यां सभायां गच्छन्नासीत् तदा केसरीसिंहः महाराणां स्वदेशस्य स्वाभिमानं मेवाडस्य परम्परां स्वशक्तिं बोधयितुं डींगळभाषायां त्रयोदशसोरठानि ''चेतावणी रा चूंगट्या'' इति नाम्ना सोरठा छन्दसि विलिख्य तं प्रति प्रेषितवान्। तान् पठित्वा महाराणाफतहसिंहः देवलीपर्यन्तं तु गतवान् किन्तु तस्यां सभायामप्रविश्यैव प्रत्यावतर्त। तेन राजस्थानस्य क्रान्तिकारिष्वन्यतमोत्साहोऽ-संचरत्। कालान्तरे सः राजद्रोहस्याभियोगे कारागृहमपि प्रेषितः। सः ठाकुरगोपाल-सिंहः (खरवातः) अर्जुनलाल सेठी दामोदरदास राठी प्रभृतीनां सहयोगेन ''अभिनव भारत समिति'' इति संघटनस्य स्थापनां कृतवान्।

स्वातन्त्र्ययज्ञवेद्यां स्वकुटुम्बं जुह्वन् क्रान्तिवीरः केसरीसिंहः 14 अगस्त 1941 तमे ख्रिताब्दे कोटानगरे आत्माहुतिं दत्तवान्।

## जोरावरसिंहबारहठः

केसरीसिंहस्य द्वौ अनुजौ आस्तां किशोरसिंहो जोरावरसिंहश्च। तयोः जोरावरसिंहस्य जन्म सितम्बरमासस्य द्वादशे दिनांके 1883 तमे ख्रिस्ताब्दे देवखेडा (देवपुरा) ग्रामे सञ्जातम्। राष्ट्रभक्तिः, वीरता, पराक्रमश्च वंशपरम्परया सहैव प्राप्नोत्। पितरि कृष्णसिंहे दिवङ्गते सति सः जोधपुरभूपतेः सेवायामगच्छत्। तस्य मनस्यपि ज्येष्ठभ्रातुरिव क्रान्तिकारि-विचाराः प्रज्ज्वलिता आसन्। जोरावरसिंहः रासबिहारीबोसेन साकं मिलित्वा देहल्यां ''चान्दनी चौक'' इत्याख्ये स्थाने लार्ड हार्डिंसस्योपरि आग्नेयास्त्रं क्षिप्तवान्। ततः

आङ्गलसर्वकारः बहुप्रयासमकरोत् तथापि स हस्तगतो नाभवत्।

इतस्ततः परिभ्रमन् जीवनस्योत्तरार्द्धे अमरदासवैरागी नाम्ना राजस्थान मालवयोः वनाच्छादितेषु पर्वतीयप्रदेशेषु न्यवसत्। अक्टूबरमासे सप्तदशदिनाङ्के 1939 तम ख्रिस्ताब्दे एषः महान् वीरः पञ्चतत्वमवाप।

### कुँवरप्रतापसिंहबारहठः

कुँवरप्रतापसिंहः केसरीसिंहस्य पुत्ररूपेण ज्येष्ठमासे शुक्लपक्षे नवमीतिथौ 1950 विक्रमाब्दे (24 मई 1893 तमे ख्रिताब्दे) उदयुपरेऽजायत। बाल्यकालादेव तस्य मनसि वैदेशिकान् प्रति विद्रोहज्वाला आसीत्। पितुः संस्काराणां मातुः शिक्षायाश्च लाभमल्पवयसि एव प्राप्तवान् सः। तेनैव कारणेन स्वपितृव्येन जोरावरसिंहेन सार्धं देहल्यां प्रसिद्ध-क्रान्तिकारिणः अमीचन्दात् विशेषप्रशिक्षणं प्राप्तवान्। वायसरायः लार्ड होर्डिंगसस्योपरि आग्नेयास्त्रक्षेपणकाले सोऽपि जोरावरसिंहेन समं तत्रैवासीत्। परिस्थितिं विलोक्य सः ततःपलायनमकरोत् किन्तु जोधपुरं निकषा आशानाडा रेलयानस्थानके केनापि परिचितेन रेलकर्मिणा निगृहीतः।

अथ सः बनारसषड्यन्त्राभियोगे बरेलीकारागृहे पातितः। तत्र बहूनि कष्टानि सोढ्वापि क्रान्तिकारिणां विषये किमपि रहस्यं न प्रकटितवान् सर्वकारं प्रति। अमानुषीयप्रताडनात् सः पञ्चविंशे वयसि एव 24 मई 1918 तमे ख्रिताब्दे परतन्त्रतायाः बन्धनानि त्रोटयित्वा दिवङ्गतः।

इत्थं बारहठकुटुम्बेन भारतीयस्वतन्त्रतासंग्रामे अभूतपूर्वः उत्सर्गः कृतः।

व्याख्याता - संस्कृत
रा.उ.मा.वि. आगूंचा
जिला-भीलवाडा (राज.)

# प्रेरकप्रसङ्गशतकम्

❑ श्रीमती आराधना धर्माधिकारी

## द्वात्रिंशःप्रसङ्गः - गुरोरपराधे शिष्याय दण्डः।

वार्ता अतीव पुरातनी अस्ति। आवयोर्विवाहानन्तरं कति- पय एव दिवसाः व्यतीताः। योद्धपुरे इञ्जिनियरिंग महाविद्यालये पठन्तो मे पतिमहोदयाः गृहे समागताः। तेषु दिवसेषु श्वशुरालये अवगुण्ठनप्रथा अतीव तीव्रतरा आसीत्। सर्वदैव लम्बमवगुण्ठनं कृत्वा स्थातव्यमासीत्। दिवसे आवां पतिपत्नी परस्परं वार्तालापमपि कर्तुं न समर्थौ। एकस्मिन् प्रभाते श्वश्रूमाता महति श्यामघटे दधिमथ्नत्यासीत्। अकस्मात् कस्यापि कार्यस्य स्मृतिरागता। सा माम् मन्थानं दत्वा गता। इतः पूर्वमिदं कार्यं मया न कृतमासीदतः सभया शनैः शनैः रज्जुं चालयन्त्यासम्।

स्वयं पाकगृहे मामेकाकिनीं दृष्ट्वा तूष्णीं मे पतिमहोदयाः समागताः। ते मामवदन् एवं न मथ्नन्ति, दीयतां मन्थनमहं शिक्षयानि। पुनश्च ते बलपूर्वकं तीव्रगत्या रज्जुमचालयन्। सहसा घटस्य भागद्वयं संजातम्। तत्र नवनीतं च भूमौ संव्याप्तम्। ते तु रज्जुं त्यक्त्वा पलायिताः।

श्वश्रूमात्रा यदेदं दृश्यमवलाकितं सा अतीव क्रुद्धा अभव-त्, मम स्थितिश्च सर्पमूषकयोरिवाभवत्। यदि मया तेषां प्रति संकेतः कृतः स्यात्तदापि स दिवसे सर्वसमक्षं मम समीपे कथं समागत इति भर्त्सना मयैव सह्या भवेत्। अतो मयैकैकाकिन्या मौनेन सह्याभवत्। एतदनन्तरं न कदापि श्वश्रूमाता एतत्कार्यं मामकथयत्। पतिमहोदयानां च कथनमासीन्मया एकस्मात्कार्यान्मुक्तिर्दापिता इति।

218, धर्माधिकारिभवनम्
ब्रह्मपुरी-जयपुरम्।

# पतितपावनी - लोककल्याणकारिणी गङ्गा

❑ प्रतिभा शर्मा

**यावदस्थीनि गङ्गायां तिष्ठन्ति पुरुषस्य तु।**
**तावद् वर्षसहस्राणि स्वर्गलोके महीयते।।**

भारतीयसंस्कृतेः धर्मस्य कर्मणः च विशिष्टं महत्वं वर्तते। धर्मेण विना कर्मणः न सिद्धिः। धर्म एव लौकिक-पारलौकिकश्रेयसः प्राप्त्यर्थं मूलं साधनं वर्तते। धर्मस्य साध्यानां साधनपक्षानाञ्च स्थापनायां पतितपावनीगङ्गायाः विशिष्टमवदानमस्ति। यथा चैतन्यं विना शरीरं व्यर्थं भवति तथैव मुक्तिसाधिकां गङ्गां विना सर्वकर्म-काण्डानि व्यर्थमेव इति। दर्शनमात्रेणेव लोकः भवसागरात् मुक्तिं प्राप्नोति। अस्मात् कारणादेव गङ्गायाः प्रशंसायामनेके मंत्राः अस्माकं साहित्ये उपलब्धाः सन्ति। प्रायः सर्वत्र वेदेषु-पुराणेषु साहित्येषु च गङ्गास्तवनं समुपतिष्ठते।

गङ्गामाश्रित्य मुनिः विद्वान् वा धर्मार्थकाममोक्ष-पुरुषार्थचतुष्टयं प्राप्य कृतार्थो जायते। कन्यादानेन, गोऽन्नदानेन च यादृशं पुण्यं जायते तदपेक्षया शताधिकं गङ्गाजलपानेनैव जायते। प्रत्यक्षरूपे दृश्यते यत् गङ्गाजलं बहुदिनानि पावत् शुद्धं भवति तस्मिन्नेव एतादृशी क्षमता विद्यते यत् कीटाणुः तत्र नैव समुपपद्यते। सहस्रचान्द्रायणव्रतानुष्ठानेन यत्फलप्राप्तिः भवति तादृशी प्राप्तिः गङ्गामृतपानादेव जायते। यः कोऽपि जनः सभक्तिस्नातः गङ्गायां, तस्य कुलं स्वयमेव च तरति। इतोऽपि न अपितु तज्जलस्पर्शेन स्नानेन च मानवस्यानेक-जन्मनः पापं विनष्टं भवति तथा सः पुण्यभागी च भवतीति। अत एव सा पतितपावनी मोक्षदायिनी च कथिता।

हिन्दूसमाजे कथितं यत् यः कोऽपि गङ्गायां यज्ञ-दान-तपः-जप-श्राद्ध-देवपूजादिकार्याणि कुर्यात् तस्मिन् कोटिशः गुणाः समुत्पद्यन्ते वर्धन्ते च। गङ्गाजलेन श्राद्ध-कर्मकृतेन पिण्डदानेन च सः स्वपितरौ भवसागरात् उद्धरति। तस्य पितृगणाः सहस्राधिकवर्षं स्वर्गे वसन्ति।

गङ्गास्नानेन शारीरिकमलापनोदनं भवति अपरस्तु सद्यः स्फूर्तिः औषधीयगङ्गाजलपानात् रोगशमनं च भवति इतोऽप्यधिकं महत्त्वं तस्यां स्नाने अस्ति। स्नानेन आत्मशुद्धिः भावशुद्धिः आत्माभ्युदयश्च भवन्ति। एवमेव गङ्गा समेषां मानवानां कल्याणाय, सुखवर्धनाय, भुक्तिमुक्तिप्रदानाय चास्ति। यः जीवः गङ्गायां मृत्युं प्राप्नोति स तु स्वर्गं गच्छति निश्चितरूपेण। कथितम् च

**अकामो वा सकामो वा गङ्गायां यो विपद्यते।**
**स मृतो जायते स्वर्गे नरकं च नैव पश्यति।।**

धर्मशास्त्रे कथितमस्ति यत् सतयुगे सर्वस्थलानि पवित्राणि, त्रेतायुगे तु पुष्करः, द्वापरे कुरुक्षेत्रम्, कलयुगे तु मोक्षप्रदायिका गङ्गैव पवित्रा भवेत्। पौराणिकमतानुसारेण भगवतः विष्णोः चरणकमलसम्भूतत्वात् तस्याः गङ्गायाः अपरं नाम विष्णुपदी विष्णुप्रियेति वा। 'गङ्गामयः' इत्यस्या-भिप्रायः विष्णुमयः ब्रह्ममयः वेति।भौतिकदृष्ट्या या गङ्गा मुक्तिप्रदायिका वर्तते पारमार्थिकदृष्ट्या सैव मुक्तिसाध्यरूपा-ऽस्ति।

गङ्गायाः जलं श्वेत-स्वादु-स्वच्छ-रुचिकर-पाचनशक्तिवर्धकं च भवति। इदानीमपि गुणानुकरणेन वैदेशिकाः अपि गङ्गाजलं स्वीकुर्वन्ति। वैज्ञानिकपरीक्षणेन सिद्धमस्ति यत् गङ्गायाः जले शक्तिवर्द्धनाय अपूर्वक्षमता विलसति। क्षीणकायः यदा गङ्गाजलसेवनं औषधिवत् कुर्यात् तदा सः बलं शक्तिं च प्राप्नोति। गङ्गाजलसेवनेन अजीर्णता-जीर्णज्वर-संग्रहणी-तपेदिक-दमा-प्लेग-मलेरिया-संक्रामकरोगेभ्यः मुक्तिः, जीवने कान्तिसञ्चारश्च। यस्मात्

भूभागात् गङ्गा प्रवहति तत्र 'रेडियम्' इत्याख्यः पदार्थः विद्यते येन शारीरिकव्रणतः, चर्मरोगात् मुक्तिः भवति स्वास्थ्य-लाभश्च भवतीति। पेरिसनगरस्य सुविख्यातचिकित्सकेन मि. डेरेलमहोदयेन प्रमाणितं यत् गङ्गाजलसेवनेन जलकारणेन समुत्पन्नस्य 'हैजा' इत्यस्य रोगस्योन्मूलनं भवतीति। नैकैः वैज्ञानिकप्रयोगैः गङ्गाजलस्य पथ्यता संसाधितास्ति इदानीमपि।

गङ्गायाः कीर्तिः गौरवमतीव विस्तृतमनन्तं च वर्तते। गङ्गा भारतीयसंस्कृतेः शरीरान्तःस्थितरक्तनलिकासु रक्तमिव प्रवहति। गङ्गेयं भारतीयसंस्कृतेः आध्यात्मिकास्थायाः धर्मस्य पर्यायभूता स्वस्थ्यलाभकारिणी भुक्ति-मुक्तिप्रदायिका चास्ति। चिरात् संरक्षिताया अस्याः संरक्षणम् इदानीमपि अपेक्षितं यतोऽभ्युदयनिःश्रेयससिद्धिः प्राप्तिकरणे सा महती बलवती। वयं सर्वे सौभाग्यशालिनः येषां हृदये गङ्गामाहात्म्यं विराजते। कथितम् च

**गङ्गा माहात्म्यमाख्यास्ये सेव्या सा भुक्तिमुक्तिदा।**
**येषां मध्ये याति गङ्गा ते देशाः पावनाः वराः।।**

शोधच्छात्रा
राष्ट्रिय-संस्कृत-संस्थानम्
जयपुरपरिसरः, जयपुरम्

## ज्योतिषवास्तु-प्रशिक्षणशिविर-समापन-समारोहः



राजस्थानसंस्कृताकादम्याः तत्त्वावधाने श्री दादू आचार्यसंस्कृतमहाविद्यालये प्रचलितस्य पञ्चदश-दिवसीयस्य ज्योतिष-वास्तु प्रशिक्षणशिविरस्य समापन-समारोहः अक्टूबरमासस्य त्रयोदशे दिनाङ्के समभवत्। अस्मिन्नवसरे दादूमहाविद्यालये प्राक्काले प्रकाशतां नीयमानायाः 'ज्ञानाञ्जलिः' इत्याख्यायाः वार्षिकीपत्रिकायाः पुनः प्रकाशनं प्रारभ्य तस्या लोकार्पणं महाविद्यालयस्य व्याख्यात्र्या श्रीमती अंजना शर्ममहोदयया रचितस्य 'संस्कृत साहित्य का इतिहास' इति नामेधस्य ग्रन्थस्य च विमोचनं समभवत्।

समरोहेऽस्मिन् जयपत्तनस्था नैके संस्कृत-मनीषिणः दादूमहासभाया महाविद्यालयस्य समिति-सदस्याश्च समुपस्थिता आसन्। आध्यक्ष्यं प्रकुर्वद्भिः देवर्षिकलानाथशास्त्रिभिः संस्कृतप्रचाराय एतादृशस्य कार्यक्रमस्य समायोजनं कर्त्तव्यमिति तदर्थं स्वकीया शुभकामना प्रदत्ता।

प्रशिक्षणेऽस्मिन् भागं गृहीतवद्भ्यः सप्तति-संख्याकेभ्यः प्रशिक्षार्थिभ्यः प्रमाणपत्रं प्रदाय तेषामुत्साहः वर्धापितः। महाविद्यालयस्य प्राचार्या डा. सुरेन्द्रकुमारशर्माणः आगतेभ्यः सर्वेभ्यः उत्साहवर्धाप-केभ्यः अतिथिभ्यः धन्यवादान् विज्ञापितवन्तः। अस्मिन्नवसरे प्रशिक्षकः डा. रामदेवसाहू, व्याख्याता तीतरियासंस्कृतमहाविद्यालयस्य, डा. राजेश्वरी भट्ट महोदया, डा. राजधर मिश्रः, डा. कौशलेन्द्र दासः, सोहनलालयादवः, वैद्यभजनदास स्वामिनः, संस्था सदस्या अन्ये चान्तेवासिनः सभ्याः नागरिकाश्च समुपस्थिता आसन्।

# काव्यस्य प्रयोजनम्

❑ राजेशकुमार शर्मा

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' सूक्तिरियं सुप्रसिद्धा अस्ति। कश्चिज्जनः कस्मिन्नपि कार्ये प्रवर्तते तर्हि फलं सम्प्रेक्ष्यैव काव्यस्य विषयेऽपि अयं नियमः भवति। काव्यस्य किं प्रयोजनम् इति काव्यशास्त्रिणः स्वस्वमतानुसारेण काव्यस्य प्रयोजनं प्रतिपादितवन्तः। विश्वजनीनं वास्तविकं सिद्धान्तमनुसृत्य आकीटपतङ्गं सर्वेषां प्राणिनां सर्वदा प्रवृत्तिः किमपि प्रयोजनमुद्दिश्यैव भवति। यदा साधारणप्राणिनामपि किमपि कार्यं प्रयोजनमन्तरा न जायते। तदा लोकोत्तरवर्णनानिपुणकविकर्मकाव्यं कथं निष्प्रयोजनं स्यात् ? अतएव अस्माकं भारतीयशास्त्रकाराः प्रत्येकग्रन्थस्य प्रारम्भे विषयसम्बन्धप्रयोजनाधिकारिरूपात्मकम् अनुबन्ध-चतुष्टयं प्रतिपादयन्त्येव। अत एव उक्तिरपि वर्तते-

**सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।**
**यावत् प्रयोजनं नोक्तं तावत् केन प्रगृह्यते।।**

संस्कृतकाव्यशास्त्रजगति सर्वप्रथमं महामुनिः भरतः नाट्यशास्त्रे नाट्यप्रयोजनं प्रतिपादयन् काव्यस्य प्रयोजनमाह-

**उत्तमाधममध्यानां नराणां कर्मसंश्रयम्।**
**हितोपदेशजननं धृति-क्रीडासुखादिकृत्।।**
**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतद् भविष्यति।।**
**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्द्धनम्।**
**लोकोपदेशजननं नाट्यमेतद् भविष्यति।।**

**( नाट्यशास्त्रे )**

तदनन्तरं भामहाचार्योऽपि स्वकीयकाव्यालङ्कारे काव्यप्रयोजनमकथयत्-

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
**करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्।।**

**( काव्यालङ्कारे )**

किन्तु सर्वेषामाचार्याणां काव्यप्रयोजनोपरि विचारः विस्तृतरूपेण ग्रन्थेषु दृश्यते, मम्मटस्य काव्यप्रयोजनं पूर्वोक्तानां सर्वेषां प्रयोजनानां संग्रहरूपं वर्तते। अतः संस्कृतकाव्यशास्त्रजगति मम्मटाचार्यस्य काव्यप्रयोजनमतिप्रसिद्धम्। स आचार्यः काव्यप्रकाशे काव्यप्रयोजनानि इत्थम् उक्तवान् -

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।**

**( काव्यप्रकाशे )**

अर्थात् काव्यस्य षट् प्रयोजनानि भवन्ति। काव्येन यशःप्राप्तिर्भवतीति प्रथमं प्रयोजनम्। काव्यकरणवशादेव कालिदासादीनां यशः अद्यावधि सर्वत्र विराजते।

काव्येन अर्थोपलब्धिर्भवतीति द्वितीयं प्रयोजनम्। श्रूयते यद् धावकादयः कवयः काव्यं विधाय बहुधनम् अर्जितवन्तः। भोजप्रबन्धे एतादृश्यः विविधाः कथाः सन्ति। आधुनिके युगे तु इदं प्रयोजनं सर्वाधिकं चरितार्थं भवति।

काव्ये व्यवहारज्ञानं भवतीति तृतीयं प्रयोजनम्। काव्ये विविधं व्यवहारं पठित्वा पाठकः स्वकीयं व्यावहारिकं ज्ञानं संवर्धयति। अतः काव्यज्ञाः व्यवहारमर्मज्ञाः भवन्ति।

अमङ्गलस्य निवारणं काव्ये भवतीति चतुर्थं प्रयोजनम् श्रूयते यद् बाणस्य भार्यायाः शापवशात् मयूरनामा कविः कुष्ठरोगग्रस्तो बभूव। स च सूर्यशतकं नाम काव्यं निर्माय सूर्यप्रसादात् रोगमुक्तोऽभवत्। जानन्त्येव यदद्यापि कवितां कुर्वन्तो जनाः स्वकीयं दुःखमयं जीवनं सुखमयं कुर्वन्ति।

परमानन्दस्य प्राप्तिः काव्येन भवतीति पञ्चमं प्रयोजनम्। मानवस्य चरमं लक्ष्यं आनन्दस्योपलब्धिः वर्तते। काव्यं कुर्वन्तो जनाः काव्यं पठन्तो वा सहृदयाः तत्कालमेव अलौकिकम् आनन्दं प्राप्नुवन्ति। तस्मिन् काले तेषां कृते सर्वं रसमयं भवति। मोक्षसहोदरः एष काव्यानन्दः कथितः। परनिर्वृतिरूपम् इदं प्रयोजनं सकलप्रयोजन- मौलिभूतम् इति कथितम् अस्ति।

कान्तासम्मितयोपदेशस्य प्राप्तिर्भवतीति षष्ठं प्रयोजनम्। वेदाः प्रभुसम्मितम् उपदेशं प्रस्तुवन्ति। इतिहासपुराणादयः सुहृत्सम्मितमुपदेशं ददति किन्तु काव्यं कान्तासम्मितमुपदेशं प्रददाति। अयं एतादृश उपदेशः अस्ति यस्य स्वीकारे स्वयमेव

जनः प्रवर्तते। ''रामादिवद् वर्तितव्यं न रावणादिवत्'' इति रसमयेन विधिना उपदिशत् काव्यं सर्वमान्यं उपदेशविधिम् अतिशेते।

विश्वनाथेन अपि काव्यप्रयोजनानि कथितानि-

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।**

**( साहित्यदर्पणे )**

तदनन्तरम् अनेके कवयः काव्यप्रयोजनानि प्रतिपादित-वन्तः परन्तु तेषां तादृशं वैशिष्ट्यं नास्ति यादृशं वैशिष्ट्यं मम्मटोक्तानां काव्यप्रयोजनानाम् इति दिक्।

**शोध छात्रः**
राष्ट्रियसंस्कृतसंस्थानम्
जयपुरम्

**गतांकादग्रे**

# पदयात्रायाः मार्गोऽप्यावरुद्धः

❑ **वेणीमाधव धर्माधिकारी**

अधुना अस्माभिर्बेतियातः पटनानगरे प्राप्तव्यमासीत् परं बेतियायाः तत्पार्श्ववर्त्तिषु च मार्गेषु यत्र तत्र सर्वत्राङ्ग्ल-सैनिकाः सन्नद्धाः प्रहरित्वं कुर्वन्तिस्म। केभ्योऽपि मार्गेभ्यो गमनं संभवमेव नासीत्। रात्रौ विचारविनिमयः समभवत्। आप्टे महोदयानां निश्चयः अचल आसीत् यत् किमपि भवतु श्वः पटनानगरार्थे प्रस्थातव्यमेव। राजमार्गेण गमनं नोचितमतो निर्णीतं यत् गंडकीनद्यां नौकया पटनानगरे गन्तव्यम्। तदर्थमपि नदीतटं प्राप्तुं दशद्वादशमाइलानां पदयात्रा करणीयैवासीत्। अगस्तमासस्य पंचदशतमे दिवसे प्रातश्चतुर्वादनसमये वयं गण्डकीनदीं प्रति प्रस्थिताः। गण्डकीघट्टे सम्प्राप्ताः। नौकान्वेषणस्य प्रयत्नः कृतः। अगस्तमासः, वर्षायाः प्रभावस्तीव्रतरः नद्यां पूरः प्रवर्द्धमानः, एतादृश्यां स्थितौ नदीमार्गेण पटनापर्यन्तं गन्तुं कोऽप्युद्यतः किं करणीयम्? तदाहं स्थानीयस्य कस्यचित्परिचित-सज्जनस्य समीपं गतः।।

अहं स्वस्य आप्टेमहोदयानां च परिचयं तस्मै न प्रदत्तवान्। कस्यामवस्थायां बाबामहोदयैः पटनानगरे प्राप्तव्यमेवेत्यपि सम्यगवबोधितम्। ते सज्जनास्तत्रत्यास्ते नाविकान् जानन्तिस्म। तैरेको नाविकः सज्जीकृतः। चतुर्दशरूप्यके भाटके एका लघ्वी नौका (डोंगी) नियोजिता। नाविकस्य नाम गुमाईबाबा इत्यासीत्। तस्य वयोऽपि षष्टि-पञ्चषष्टिवर्षात्मकमासीत्। अथापि प्रवर्द्धमानायाः नद्या वक्षसि नौकाचालनस्य तस्मै न केवलमनुभव एव प्रत्युतात्मविश्वासपूर्णो दृढनिश्चयोऽप्यासीत्। स्वसाहाय्यार्थं दश-द्वादशवर्षीयं स्वदौहित्रमपि सहानीतवान्। सर्वनिर्णये मध्या-ह्नवेला संजाता।

नदीमार्गेण पटनानगरं प्रति प्रस्थानम् वयं घट्टे समागताः। मम मनसि समागतमस्माभिः परावर्त्तनीयम्, इयती दीर्घा यात्रा नौकया नोचिता। मनमुखान्निःसृतम् महत्संकटम् रक्षतम्- बाबामहोदय ! नद्याः प्रवाहं पश्यत त्वरितमेव तेषामुत्तरं प्राप्तं किं विभेषि जीवने बहूनि संकटान्युत्तरणीयानि। चल, उपविश नौकायाम्। भूयश्चैते गुमाईमहोदयाः सन्त्येव सह। भयं कुतः। किं गुमाईमहोदय ! अपि सत्यं वदामि। गुमाईबाबा महोदयः आत्मविश्वासपूर्णेषु शब्देषु प्रोक्तवान्-आम् ! आबामहोदय ! भयस्य वार्त्तापि नास्ति अस्माकं तु जीवनमेव गंडक्याः गंगामातुश्चाङ्के व्यतीतम्। किंचिदपि भयस्य नास्ति कारणम्। इदन्त्वस्माकं दैनिकं कर्म।

मध्याह्ने एकवादनसमये गंडकीगंगामात्रोर्जयकारेण सह नौकाचालनं प्रारब्धम्। पूरमय्याः नद्याः वक्षसि लहरीभिस्सह नौका दोलायमाना आसीत्। दूरतः प्रधावमानाः लहर्यः एवं भासतेस्म नौकामधः सम्मर्द्य निर्गमिष्यन्ति। लघ्वी नौका, तस्या उपरि आघाताः पतन्तिस्म। एवं भासतेस्म नौका शीघ्रमेव निमज्जमानास्ति परं गुमाईबाबामहोदयाः स्वहस्तलाघवेनैतासु लहरीहष्वाघातेष्वपि च परिगच्छन्तिस्म। मध्ये मध्ये चास्मान् स्वनाविकजीवनस्य रोमाञ्चकारिण्यो घटनाश्च श्रावयन्तिस्म।

प्रायः षड्होरात्मिकां यात्रां कृत्वा नौका तटे समानीता। संध्यासमयः संजात आसीत्। रात्रौ नौकाचालनं नोचितमिति नौका तटे सुबद्धा। हस्तौ पादौ प्रक्षाल्य किञ्चिद् विश्रामः कृतः। सह पृथुककरपट्टिकादि यत्किञ्चिदानीतं सर्वै-र्मिलित्वा भक्षितम्। विकसितचन्द्रिकारात्रिरथापि निर्जनं क्षेत्रमिति प्रत्येकेन क्रमशः जागरणं कृत्वा रात्रिर्व्यत्यापिता।

प्रातः प्रत्यूषे एवास्माभिर्यात्रा पुनः प्रारब्धा। महता लाघवेन गुमाईमहोदयः नौकां चालयति स्म। आप्टेमहोदयाः विविधविषयेष्वस्माभिः चर्चां कुर्वन्तस्म। सम्पूर्ण रामायण- मेका राजनीतिमयी घटनेतिविषयेऽस्मिन् तैर्विस्तृतं प्रबोधितम्। सम्पूर्णेऽपि दिवसे नौकायामेवोपविष्टाः। लहरीर्विदारयन्ती उच्छलन्ती नौका गुमाईमहोदयानां हस्ताभ्यां वर्द्धमाना आसीत्। वार्ताप्रसंगे कथं दिवसो व्यतीतः अवगतमेव न।

219, धर्माधिकारिभवन्,
ब्रह्मपुरी, जयपुरम्

क्रमशः....

# पुरातन-वेदान्तदर्शनम्

❑ श्रीकृष्ण शर्मा

'वेदान्त' इति श्रुत्वैव बुद्धौ आयाति अभिधानं श्रीमदाद्यशङ्कराचार्यस्य। किञ्च आद्यशङ्कराचार्यः एव प्रतिष्ठापक व्यवस्थापकश्च अस्ति वेदान्तदर्शनस्य (प्रमुखतया अद्वैतस्य)। अतः शङ्कराचार्यात् प्राक् वेदान्तस्य पुष्टिकर्त्तारः ये ये सिद्धान्ताः आसन् ते सम्मिलितरूपेण ''पुरातन-वेदान्त'' नाम्ना एव अभिधीयन्ते।''पुरातन-वेदान्तस्य स्वरूपं किमासीत्?'' के के आचार्याः तत्र आसन्? किं च तत्र वैशिष्ट्यम्? कथं ते वेदान्तदर्शनस्य आधारभूताः सञ्जाताः? सन्ति एते विचारणीयाः प्रश्नाः। एतेषामेव एव प्रश्नानां समाधानं करिष्यति शोधपत्रमिदम्। इति जिज्ञासायामेव प्रयासः अस्ति।

शङ्कराचार्यात् प्राक् त्रयः एव वेदान्तसरण्यः दृष्टिगताः सन्तिः-

प्रथमा - अद्वैतवादस्य

द्वितीया - भेदाभेदवादस्य

तृतीया - भेदवादस्य

अद्वैतवादस्य परम्परायाः उल्लेखः वेदान्तेतरदर्शनानां ग्रन्थेषु अपि प्राप्यते यथा जैन-दार्शनिकसमन्तभद्रः यः शङ्करात् पूर्ववर्ती अपि अस्ति आप्तमीमांसायाम् अद्वैतवादस्य उल्लेखं चकार -

**अद्वैतैकान्तपक्षे दृष्टो भेदो विरुध्यते।**
**कारकाणां क्रिययोश्च नैकं स्वस्मात् प्रजायते।।**

बौद्ध-दार्शनिकः शान्तरक्षितः तत्त्वसंग्रहग्रंथे अद्वैतवादस्य उल्लेखं कृतवान्। तस्य टीकाकारः अपि ''अद्वैतदर्शनावलम्बिनश्च औपनिषदिकाः'' एवमुक्त्वा अद्वैत सिद्धान्तस्य उल्लेखं विधत्ते। स्वयमेव शङ्कराचार्यः अपि स्वपूर्ववर्ती वेदान्ताचार्याणां - सुन्दरपाण्ड्यः, द्रविडाचार्यः, उपवर्षः, भर्तृप्रपञ्चः, गौड़पादः तथा ब्रह्मदत्तादीनां मतानाम् उद्धरणं दत्तवान्। बादरायण एव गौडपादस्य ग्रंथेषु भाष्यम् अपि चकार।

स्वयं बादरायणः अपि स्वकीये ब्रह्मसूत्रे आत्रेयः आश्मरथ्यः, औडुलौमिः, बादरिः, जैमिनिः, कार्ष्णाजिनिः, काशकृत्स्नः आदीनां नामनिर्देशं मतोद्धरणं चकार। वेदान्त-दर्शनं हि भारतीय-दर्शनस्य मूर्धन्यं रत्नम् अस्ति। वेदस्यान्तः सिद्धान्तो वेति विशिष्टार्थेऽस्य प्रयोग उपनिषत्सु दृश्यते अस्मिन् न काचिद् विमतिः वाद-विवादश्च अस्ति।

पाश्चात्यानां पौर्वात्यानां सर्वेषाम् अत्र ऐकमत्यम् अस्ति। यथा पाश्चात्यविद्वांस : A.L. Basham स्वकीये "The Wonder that was India" नाम्नि ग्रंथे लिखति - Vedanta ("the end of the Vedas") also called Uttara Mimamsa, is the most important of six systems, and unites many sub-schools, it has produced the characteristic features of modern intellectual Hinduism."[2]

1 वेदान्ते परमं गुह्यम् (श्वे. उप. 6/22) वेदान्त विज्ञान सुनिश्चितार्थाः (मुण्डक 3/2/61).

2 The Wonder that was India. pg. 327.

सोऽपि मनुते यत् ब्रह्मसूत्रं माण्डूक्यकारिकेति ग्रन्थद्वयमेव पुरातनवेदान्तग्रन्थत्वेन अस्ति। तत्र माण्डूक्य-कारिकायाः प्रणेता गौड़पादाचार्यः भगवत्पादशङ्कराचार्यस्य परमगुरुर्गोविन्दाचार्यस्य च गुरुः आसीत्, इति प्रमाणैः सिद्धम्। तस्य दर्शनम् अद्वैतम् इत्यपि प्रथितम्। किन्तु ब्रह्मसूत्रस्य किं दर्शनम् अस्ति ? इत्यत्र विवादः अस्ति।

बहवः विद्वांसः आचार्याः भिन्नं-भिन्नं प्रतिपादयन्ति यथा तालिकायां लिखितम् अस्ति -

| आचार्यः | स्वमतानुसारं ब्रह्मसूत्रस्य दर्शनम् |
|---|---|
| 1. गोस्वामिपुरुषोत्तमाचार्यः मूलचन्द्रतुलसीदासः | शुद्धाद्वैत-वादः |
| 2. डॉ. जार्ज थीबो, रामानुजाचार्यादयः | विशिष्टाद्वैतवादः |
| 3. डॉ. बी.एस. घाटे | द्वैताद्वैतवादः |
| 4. आद्यशङ्कराचार्यादयः, बहवः अन्ये च | अद्वैतवादः |
| 5. ब्रह्मसूत्रस्य अन्ये भाष्यकाराः | भिन्नं भिन्नम् |

परन्तु अत्र नान्यानि मतानि तावत् पुष्टानि यावत् अद्वैतवादः अस्ति। प्राचीनत्वात् अविच्छिन्नपरम्परानुसारेण मूलत्वात् सर्वार्थोपनिषद्दर्शनानुकूलत्वात् सर्वश्रुति-संग्राहकत्वात् श्रुति-स्मृति-युक्ति-पुराणेतिहाससिद्धत्वाच्च अद्वैतवादः एव बादरायणस्य दर्शनमिति बहूनां (अस्मादृशानाम् अपि) विचारकाणां मतम्।

ब्रह्मसूत्ररचनाकालः ईशवीयद्वितीयशतीति आचार्यकीथ महाभागेन निश्चितम् तत्र सर्वास्तिवाद-योगाचारदर्शनयोः स्पष्टोल्लेखात् प्रथमशत्यां हीनयानमहायानविभागानां उत्पत्तिकारणाच्च। किन्तु याकोबी मतमिदं अस्वीकरोति लिखति यत् तस्य रचनावधिः 350-450 ईसवीयपर्यन्तम् कस्मिंश्चित् समये निश्चितः। तदैव बौद्धदर्शननिरूपणत्वात् दर्शनशास्त्ररूपेण।

एवञ्च श्री संगमलालपाण्डेयमहाभागेन अपि ब्रह्मसूत्रस्य रचनाकालः ''प्रि-शंकराद्वैतफिलासफीति'' ग्रंथे ''ईसापूर्व-द्वितीयशतिः निश्चितः यत् यतः शून्यवादोल्लेखो ब्रह्मसूत्रे न विद्यते ततः, ईसापूर्वद्वितीयशतीति ब्रह्मसूत्रकालः।'' क्वचित् क्वचित् रामायण-महाभारतादिष्वपि वेदान्तनिरूपणं दृश्यते तदपि पुरातनवेदान्तः इति केचित्। अपरं च यतो हि भगवद्गीता वेदान्तदर्शनस्य स्मृतिप्रस्थानत्वेन स्वीक्रियते, सा च महाभारतार्थसंग्रहभूताभिमता, अतएव तदुपजीव्याः यत्र-यत्र ये ये ग्रंथाः, सिद्धान्ताः, वादाः विचाराश्च सन्ति ते न पुरातनवेदान्ते गण्यन्ते। पुरातनवेदान्तस्य आचार्याणां, ग्रंथानां, सिद्धान्तानाम्, आविर्भावकालस्य च संक्षिप्तपरिचयः अत्र संजातः।

**शोधछात्रः** ज.रा.रा.सं.वि.वि., जयपुरम्


## निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम ....................................पुत्र/पुत्री श्री..............................भवन संख्या.............**
**गली/ मोहल्ला/कॉलोनी................................... वाया/पोस्ट ऑफिस.............................**
**तहसील............................... जिला........................ राज्य..........................**
**देश.................... पिन........................................दूरभाष............................**
**मोबाईल नं..................................ईमेल....................................................**

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक
**भारती संस्कृत मास पत्रिका**
बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014
ई–मेल – sanskritbharti09@gmail.com

# कादम्बर्याः भट्टमथुरानाथशास्त्रिरचितचषकटीकायाः वैशिष्ट्यम्

❑ हनुमानसहाय माली

को न जानाति संस्कृतजगति भट्टश्रीमथुरानाथशास्त्रि-महोदयान्। असाधारणप्रतिभावन्तः साहित्यशिल्पिनः कविशिरोमणिभट्टश्रीमथुरानाथाः स्वजीवने नैरन्तर्येण अजस्ररूपेण च साहित्यसेवां कृतवन्तः। संस्कृतकाव्यशैल्यां गजलगीतिप्रभृतिनूतनविधानामवतारणेन युगपुरुषः न केवलं राजस्थानस्य विद्वत्समाजे, अपितु अखिलस्य भारतवर्षस्य विद्वन्मण्डलीसु संस्कृतसाहित्यसर्जकरूपेण, निबन्धकार-कथाकार-सम्पादकरूपेण च सुप्रसिद्धा वर्तन्ते। संस्कृतपत्र-कारता-विकासेभाषासंवर्धने च एतेषां भूमिका चिरस्मरणीया वर्तते।

राजस्थानप्रदेशस्य जयपुरनगरे निवसतामान्ध्राभिजनानां 'देवर्षि' इत्युपाधिधारिणां विद्वद्ब्राह्मणानां कुले 1889 तमे वर्षे आषाढमासे सुरभारत्याः विभूषितरूपस्य तस्य श्रीभट्टमथुरानाथशास्त्रिमहोदयस्य जन्म अभवत्।

संस्कृतसाधनाशिखरपुरुषोऽयं बहुप्रतिभाद्भुतः कविश्रेष्ठः सार्वभौमः देवर्षिपदव्यलङ्कृतः सन् स्वीयकृतिभिः संस्कृतसाहित्योदधौ नूतनतामधात्। तदीयाः कृतयः सहृदयहृदये भूयसीं चमत्कृतिं जनयन्ति। पत्रसम्पादनेन साहित्यिक-पत्रकारताक्षेत्रे भट्टमहोदयैर्नवीन-युगावतारणा यथा विहिता, तथैव प्राचीनग्रन्थपरिष्कारे, भूमिकालेखने, टिप्पण्यादि-लेखने चापि सुप्रसिद्धा वर्तन्ते।

भट्टमहाभागैः कादम्बर्याः निबद्धा चषकेत्याख्या टीका भानुचन्द्रगणि - सिद्धचन्द्रगणिभ्यां प्रणीतायाः कादम्बरीटी-कायाष्टिप्पणीरूपा वर्तते। इयं खलु ग्रन्थ - ग्रन्थिभेदनपुरस्सरं पाठादिसंशोधने तन्निर्धारणे चापि प्रवर्तते। प्राचीनटीका-काराणां भ्रान्तयोऽप्यत्र महाभागैरेभिः बहुत्र पुरस्कृता दृश्यन्ते।

सर्वप्रथमं टिप्पणीयं भानुचन्द्रगणिसिद्धचन्द्रगाणिभ्यां प्रणीतया टीकया सह मुम्बईनगरस्थनिर्णयसागरमुद्रणालयात् प्रकाशिताऽभवत्। भट्टमहाभागैः कादम्बर्याः पाठसंशोधने निर्धारणे च संस्करणेऽस्मिन् सुमहान् प्रयासो विहित इति ग्रन्थदर्शनेन ज्ञातुं शक्यते।

भट्टश्रीमथुरानाथप्रणीतायां कादम्बर्याः चषकटीकायां श्रीभानुचन्द्रगणि - तच्छिष्यसिद्धचन्द्रगणिमहोदयाभ्यां कृतायाम् एतत् सूचितम्। यथा चषकटीकायाम् उपोद्घाते मथुरानाथशास्त्रिणा ''सेयं टीका प्रत्येकपदस्य पर्यायप्रकटन एव व्यग्रा'' कामं स पर्यायशब्दः ''इन्द्रस्य टीका बिडौजाः'' एव किं न भवेत्। एको यः शब्दः पर्यायत्वेनादौ परिगृहीतः, अन्तपर्यन्तमपि स एव पदे-पदे व्यवह्रियते। यथा - ग्रन्थे यत्र यत्रापि सुखपदमायातं तत्र तत्र 'सातम्' इत्यनेनैव व्याख्यातं महाभागेन । 'भ्रान्तिः आरेका, जरा विस्रया, कुवलयं कुवेलम्' इत्यादिरूपेणैव सर्वत्र व्याख्यातवानयम्।

यथा - 1. तत्र मूले शूद्रकवर्णन - प्रसङ्गे उक्तम् -

**''हर इव जितमन्मथः'' पृ. ८, १.१**

अत्र कादम्बर्याः पूर्वार्धभागस्य श्रीभानुचन्द्रगणिकृतटी-कायामुक्तम् - पृ. ८ जितो निर्जितो मन्मथजनकत्वान्मन्मथा-नीन्द्रियाणि येन स तथा क इव। हर इव शंभुरिव। सोऽपि जितमन्मथः स्यादित्युभयोः साम्यम्। भट्टमथुरानाथशास्त्रिणा चषकटीयामुक्तम् पू. ८ (चषकटीका)

सौन्दर्येण (अथवा संयमातिशयेन) जितो मन्मथो येनेति सरलोऽर्थः। ममाभिप्रायः -

हरति पापं यः सः महेश्वरः शिवः। शिवेन स्वकीयेन सौन्दर्येण स्वकीयेन वा अतिशयसंयमेन मन्मथः कामदेवः।

अत एवोक्तं मूले ''हर इव जितमन्मथः''। शिवकामदेवयोः पूर्णसाम्याद् पूर्णोपमाऽलंकारः।

1. सा पूर्णा, यदि सामान्यधर्म औपम्यवाचि च
उपमेयं चोपमानं भवेद्वाच्यम् - (साहित्यदर्पणे)

यथा शङ्करः कामदेवं जितवान्, तथैव शूद्रकः स्वसंयमेन वासनाः जितवान् इति। पूर्णोपमायाम् उपमानोपमेययोः साधारणधर्मवाचकयोश्च पूर्णतया स्पष्टता भवति, अतः भट्टमथुरानाथशास्त्रिणा कृतो विग्रहः सर्वथा सुग्राह्यः।

मूले उक्तम्

''स्वयमारब्धमृदङ्गवाद्यः संगीतकप्रसङ्गेन।'' पृ. 14

भानुचन्द्रगणिकृतटीकायामुक्तम् -

स्वयमात्मनैवारब्धं विहितं मृदङ्गवद्वाद्यं वादित्रं येन स तथा। उभयस्ताभां तद्वादनादिति भावः।पृ. 14

अत्रैव भट्टमथुरानाथशास्त्रिणा चषकटीकायामुक्तम् -

मृदङ्गस्य वाद्यं येन, इत्येवार्थः।पृ. 14.1

ममाभिप्रायः -

अत्र बहुब्रीहौ विग्रहे 'आरब्धं मृदङ्गवाद्यं येन सः' इत्यत्र मृदङ्गवाद्यपदं द्विधा सम्पन्नमिति। श्रीभानुचन्द्रगणिना तुल्य-भावेन मृदङ्गवद्वाद्यमिति स्वीकृतं पुनश्च शास्त्रिणा षष्ठीगर्भेण मृदङ्गस्य वाद्यमिति स्वीकृतम्।

टीकाकारमहाभागस्य व्याकरणज्ञानमप्यलौकिकम्। कर्मकर्तृवाच्ययोः सर्वत्रापि निरर्गलं प्रयोगः। 'कृतान्तमुख-कुहरा-दिव विनिर्गतमात्मानं मन्यमानः (अहम्)' इत्यत्र 'मन्यमानः' इति कर्तृवाच्यक्रियायाः 'ज्ञायमानः' (पृ. 74) इति व्याख्या।

एवं कादम्बरीग्रन्थस्य टीकासम्पादने भट्टमहाभागैर्यो हि प्रयासो विहितः सः तेषां कथनेनाऽनेन ज्ञातुं शक्यते। वस्तुतः भट्टमहोदयानां टिप्पणीं विना टीकाया अस्या एकमपि पदं ज्ञातुं न शक्यते।

**सन्दर्भ ग्रन्थसूची -**


1. कादम्बरी ''भावबोधिनी'' संस्कृत - हिन्दीव्याख्या, डॉ. जयशङ्करलालत्रिपाठी
2. कादम्बरी ''चन्द्रकला विद्योतिनी'' कृष्णमोहनशास्त्री
3. कादम्बरी ''शुकनासोपदेशः'' भानुचन्द्रसिद्धचन्द्रगणि-विरचिता संस्कृतव्याख्या। आचार्यमोहनदेवपन्तः श्री हरिश्चन्द्रविद्यालङ्कारः
4. भट्टश्रीमथुरानाथशास्त्रिणां जीवनं साहित्यसेवा च - देवर्षि-कलानाथशास्त्री


**शोधछात्र**


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारती**

खाता संख्या – **2139101912502**

**IFS Code - CNRB0002139**

# नव्याव्याकरणसारस्वतव्याकरणयोः सामान्यपरिचयः, वैशिष्ट्यञ्च

❑ कानाराम जाटः

संस्कृतभाषा देवभाषा कथ्यते। संस्कृतभाषायां मानवसंस्कृतेरितिहासः सुरक्षितोऽस्ति। इयं संस्कृत-भाषान्याभ्यः सर्वाभ्योऽपि भाषाभ्यः प्रकारे विस्तारे च महती, सौन्दर्ये विचारपवित्रतायां चान्यूना विद्यते। सत्यपि मन्दतमे विकासक्रमे क्रमोपनते च बाधासमुदये इतिहासारम्भसमयत एव संस्कृतभाषा विश्वस्यान्यासां भाषाणां समतां कुर्वन्ती समायाति। अन्याभिर्विश्वस्य भाषाभिरस्याः प्रतिस्पर्धा गुणगणकृतैव। भारतेऽजायन्त विविधानि सामाजिक-परिवर्तनानि, धार्मिकाण्युत्थानपतनानि, वैदेशिकानामा-क्रमणानि च तथापि संस्कृतं सर्वदा समभावेन सर्वत्र व्यवहारवर्त्मन्यवर्तत।

संस्कृतं सर्वदा जीवितभाषाभावमभजत यतोऽत्रैव पूर्वतनाः सर्वेऽपि ग्रन्था अलिख्यन्त। आस्तां पुराणी कथा, संस्कृतस्य सम्प्रत्यपि जीवितभाषात्वे प्रमाणमिदं यदधुनाऽपि संस्काराः प्रायोऽधिकसंख्यकभारतीयानां संस्कृत एव सम्पाद्यन्ते, महाभारतप्रभृतयो धर्मग्रन्था अधीयन्ते, स्वीया विचारा लोकविशेषैः संस्कृते प्रकाश्यन्ते, कविता ललितसाहित्यं कथोपन्यासनाटकादीनि विरच्यन्ते च।

**व्याकरणस्याविर्भावः-**

व्याक्रियन्ते शब्दा अनेन इति व्युत्पत्या वि, आङ् इति द्वाभ्यामुपसर्गाभ्यां कृञ् धातोः "करणाधिकरणयोश्च" (३.३.११७) इति सूत्रेण करणल्युट्प्रत्यये व्याकरणमिति रूपं सिद्ध्यति। शब्दसाधुत्वविवेचक-शास्त्रमित्यर्थः। अस्य च व्याकरणस्योत्पत्तिः कदाऽभवदित्यत्र निश्चितमुत्तरं नैवोपलभ्यते। परं वैदिकपदपाठानां रचनाया पूर्वमेव व्याकरणस्य स्थितिरवलोक्यते। भगवान् पतञ्जलिर्व्याकरणं "शब्दानुशासनम्" इति व्यवहरति, "अथ शब्दानुशासनम् केषां शब्दानाम्, लौकिकानां वैदिकानाञ्च" इति महाभाष्ये कथनात्। एतच्छब्दशास्त्रमधिकृत्य व्याकरणमिति नाम बहुत्र प्रयुक्तं दृश्यते।

**भट्टोजिदीक्षित परिचयः-**

अस्मिन्नेव शतके (वि. १५७०-१६५०) व्याकरण-शास्त्रस्य धुरन्धराचार्येण "भट्टोजिदीक्षित" महोदयेन "वैयाकरणसिद्धान्त कौमुदी" विलिखिता व्याकरणशास्त्र-स्याध्ययनाध्यापनपरम्परायां नव्यव्याकरणरूपेणाऽस्य ग्रन्थस्य पाणिनीयाष्टाध्याय्या इव मौलिकत्वमुपयोगित्वञ्च विद्यते अप्पयदीक्षितशिष्यो भट्टोजिदीक्षितः शब्दकौस्तुभ- प्रौढमनोरमा-लिङ्गानुशासनवृत्ति-वैयाकरण-मतोन्मज्जन-ग्रन्थानपि व्यरचयत्। यथा -

**इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम्।**
**विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे।।**

**सारस्वतव्याकरणस्य कर्तृपरिचयः वैशिष्ट्यम्ः-**

नव्यव्याकरणेषु सारस्वतव्याकरणमपि निर्दिष्टमस्ति। सारस्वतव्याकरणस्य कर्त्री साक्षात्सरस्वती विद्यते, अतः इदम् इति सारस्वतम्। सारस्वतव्याकरणस्य भूमिकायां लिखितं विद्यते यत् अनुभूतिस्वरूपाचार्येण प्रार्थिता सरस्वती सारस्वतसूत्राणि रचयामास। तत्रैव लिखितमस्ति यत् अनुभूति-स्वरूपाचार्यस्य ध्यानगुणेन सन्तुष्टा स्वकीयमातेव कृपा-वशात्साआगत्य अनुभूतिं वरं वृणीष्वेति वाणीं जगाद सरस्वतीं दृष्ट्वा अनुभूतिस्वरूपाचार्यः नवीनं व्याकरणं सरस्वतीमन्वयाचन् तदा सरस्वती स्वकण्ठसुराजितहारगर्भात् सप्तशतानि सूत्राणि दत्वा अन्तर्दधे तदनन्तरमनुभूतिरूपो व्याकरणं रचयाञ्चकार। अनेन ज्ञायते यत् व्याकरणेऽस्मिन् सप्तशतानि सूत्राणि सन्ति। अस्य सूत्रकर्त्री वाग्देवी वर्तते किन्तु अनुभूतिस्वरूपाचार्येण सरस्वत्याः प्राप्तानि सप्तशतं सूत्राणि। अतः सोऽपि रचयितेति कथयितुं शक्यते। परम्परा एनमेव सारस्वतव्याकरणकर्तृत्वेन स्वीकरोति। किन्तु युधिष्ठिर-मीमांसकानुसारं सारस्वतव्याकरणस्य लेखकः कश्चित् नरेन्द्राचार्योऽस्ति। अनुभूतिस्वरूपाचार्यस्तु सारस्वतप्रक्रियां सरलीचकार। सारस्वतव्याकरणस्य स्वरूपम्-व्याकरणेऽस्मिन् सप्तशतं सूत्राणि सन्ति। व्याकरणमिदं "एकोनविंशति भागेषु विभक्तमस्ति अर्थात् अत्र १९ अध्यायाः सन्ति।" प्रथमं संज्ञाप्रकरणमस्ति अन्तिमञ्च तद्धितप्रकरणमस्ति। अस्य व्याकरणस्य भ्वादिप्रकरणे परस्मैपदबोधकानि १५४ सूत्राणि आत्मनेपदबोधकानि २३ सूत्राणि तथा चोभयपदबोधकानि २० सूत्राणि विद्यन्ते।

**सन्दर्भग्रन्थसूची**

1. सारस्वतव्याकरणम्, चौखम्बा संस्कृत संस्थान, वाराणसी। 2. वैयाकरणसिद्धान्तकौमुदी, सेन्ट जोसेफ, इन्डस्ट्रीयल स्कूल मुद्रणालये मुद्रिता। 3. व्याकरणभूषणसार, गोपालशास्त्री, श्रीहरिकृष्ण निबन्धभवनम्, वाराणसी। 4. अष्टाध्यायी, चौखम्बा ओरियन्टालिया, वाराणसी। 5. महाभाष्यम्, राष्ट्रियसंस्कृतसंस्थानम्।

**शोधछात्रः**, ज.रा.रा.सं.वि.वि., जयपुर

पत्रिका-समीक्षा

# दूरदर्शनीया संस्कृतवृत्त-पत्रिका-वार्तावली

**- देवर्षि कलानाथशास्त्री**

अस्मिन् डिजिटलयुगे वैद्युतानमाध्यमानां (इलेक्ट्रानिक मीडिया) प्रसारणानि सर्वत्रगाणि लोकप्रियाणि च भवन्तीति सुविदितमेव। अतो दूरदर्शनाऽऽकाशवाण्यादिमाध्यमेभ्यः संस्कृतं यदा प्रसार्यते तदा तस्य परिधिः सुभृशं वर्धते। दूरदर्शनाऽऽकाशवाणीतः पञ्चनिमेषात्मिकाः संस्कृतवार्ताः प्रायो दशक-चतुष्टयात् प्रसार्यन्ते, तासां सुमहद् योगदानं संस्कृत-शिक्षार्थिषु। तस्मिन्नेव क्रमे या ''वार्तावली'' साप्ताहिक-प्रसारणरूपेण अर्धहोरात्मकावधिगता दूरदर्शनात् प्रसारयितुमारब्धा तस्याः स्वरूपमपि सुतरामाकर्षकं, सुबहु लाभकरं चेति सुमहतः प्रमोदस्य वृत्तम्। वार्तावल्यां ''समाचार'' प्रसारणं प्रामुख्यमावहतीति कृत्वा ''प्रवाहिवार्ताः'' शीर्षकवहाः समाचारा दृश्यसहिताः संस्कृतटिप्पण्या सह पूर्वं प्रसार्यन्ते येषु संस्कृत-सम्बद्धाः समाचारा हृदयमावर्जयन्ति संस्कृसेवकानाम्। गतायामेकस्यां वार्तावल्यां प्रासारि यत् प्रधानमन्त्री नरेन्द्र मोदी संयुक्तराष्ट्रसंघे भाषमाणः ''माता भूमिः पुत्रोऽहं पृथिव्याः'' वसुधैव कुटुम्बकम्, सर्वे भवन्तु सुखिन इत्यादि संस्कृतोद्धरणानि प्रास्तौत्। आयरलैंडदेशे मोदिनः स्वागतं व्याहरन्तः शिशवः ''सह नाववतु'' पूर्णमदः पूर्णमिदमित्या-दिमन्त्रानुच्चारितवन्तः। समाचारानन्तरं ''त्रिज्या'' शीर्षकवहः संवादकार्यक्रमोऽपि प्रसार्यते यत्र कस्यचन साक्षात्कारः संवादो वा परिदर्श्यते। तदनु शिक्षार्थिनां कृते संस्कृतशिक्षणाय ''व्यासः'' इति शीर्षकेण संस्कृतवाक्यानि शिक्ष्यन्ते, आंग्लभाषानुवादेन सह। अत्रैव सुरुचिरा बालहृदयावर्जकाः कार्यक्रमाः ''खेलक्रमे संस्कृत शिक्षणम्'' इत्यादयः प्रसार्यन्ते।

पर्यन्ते सुविचित्रमेकं पद्यं परिदर्श्यते ''शब्दक्रीडा'' शीर्ष- के खण्डे यत्र ''भूरिभिर्भारिभिर्भीराभूभागै'' रित्यादिविचित्रकाव्यात्मिकस्य वर्णक्रीडापरस्य कस्यचन पद्यखण्डस्योद्धरणं कृत्वा तस्यार्थ आंगलभाषायां परिदर्श्यते संस्कृतस्य वर्णगुम्फन-चमत्कारं शब्दसामर्थ्यं वा प्रदर्शयितुम्। ''परिधिः'' शीर्षकेण कस्याश्चन नाट्यप्रस्तुतेः, कस्यचनोत्सवस्य वा प्रतिवेदनं प्रस्तोतुकामेन संयोजकेन तथाविधस्य समाचारस्य दृश्यानि प्रदर्श्यन्ते। दर्शकानां प्रतिक्रिया अपि पत्ररूपेण संस्कृते प्रदर्श्यन्ते। अन्ते प्रतियोगितारूपेण कस्यचन हिन्दीचलचित्र-गीतस्य तस्मिन्नेव लये संस्कृतगीतानुवाद आहूयते-सफलः प्रतियोगी च पुरस्क्रियते। हिन्दीभाषायाः स्पर्शः केवलमत्रैव दृश्यते, अन्यथा सर्वत्रानुवाद आङ्गलभाषायामेव भवति, अहिन्दी-भाषिक्षेत्राणमाकर्षण-स्योद्देश्यं प्रतीयते तत्र। हिन्दीभाषा भारतीय-संविधानेन राजभाषात्वेन, सम्पर्कभाषात्वेन च स्वीकृतास्तीति न भेतव्यमिति निवेदयितुमिच्छामः शतशो वर्धापयामश्च सुतरां हृदयावर्जकाय ''वार्तावली'' कार्यक्रमायैतस्य प्रसारकान् संयोजकानधिकारिणश्च। वार्ताहरस्य सुनीलजोशिनः, ऋचाशर्मा-संजयदत्तसती प्रभृतिसंयोजकानां च नामान्यत्र सूच्यन्ते, सर्वेषां तेषां हार्दिकमभिनन्दनं कुर्मः, प्रार्थयामश्च सर्वान् संस्कृतस्नेहिनो यत्ते प्रतिशनैश्चरवारं सायं सार्धसप्तवादने प्रतिबुधवारं चापराह्णे सार्धत्रिवादनेऽवश्यं पश्यन्तु ''दूरदर्शन न्यूज प्रणाल्युपरि वार्तावली'' मिमाम्।

# संस्कृतपत्रिकापरिवारः

भारते सुमहती संख्याऽस्ति संस्कृत-पत्रिकाणां यासु बह्व्यः शोधपत्रिकाः संस्कृते विश्वविद्यालयैः शोधसंस्थानैर्वा प्रकाश्यन्ते, समाचारपत्रिका अपि संस्कृतसेविनां दृढसंकल्पवशात् प्रकाश्यन्ते। ''सर्जनात्मक'' संस्कृतसाहित्यं प्रकाशयन्त्यः पत्रिका अपि प्रकाशमायान्ति यासां सुदीर्घ इतिहासः ''विद्योदय''- ''संस्कृतचन्द्रिकादीनारभ्य'' सुविदितः। तादृश्यः संस्कृतपत्रिकाः (सर्जनात्मकं, विमर्शात्मकं, संस्कृतवृत्ताख्यानात्मकं चापि साहित्यं मुद्रयन्त्यः) ''सम्भाषणसन्देश'' - ''भारती'' प्रभृतयः, सम्प्रति संस्कृतजगति समाद्रियन्त इति हर्षास्पदम्। एवंविधासु पत्रिकासु पाक्षिक-पत्रिका आरभ्य षाण्मासिकपत्रिका यावत् संस्कृपत्रिकाः साम्प्रतमति नैरन्तर्येण प्रकाशमार्यान्तीति वृत्तमधिगम्य को वा संस्कृतसेवी न प्रसीदेत्?

''संस्कृतवाणी'' त्याख्या पाक्षिकपत्रिका देहलीतो निरन्तरं प्रकाश्यते यस्यां संस्कृतवार्ताः (समाचारा) अपि प्रकाश्यन्ते, लेखा अपि, काव्यरचनादयोऽपि। मसृणपत्रेषु बहुरङ्गरञ्जित-चित्रसहितमस्याः प्रकाशनं हृदयावर्जकं प्रतीयते। 38 अङ्का अस्याः प्रकाशमायाताः, इयमद्यापि नैरन्तर्यं दधातीति हर्षास्पदम्।

पाक्षिकपत्रमिदमेकतः प्रसादयेत् पाठकान् अपरतश्च षाण्मासिकम् ''अयनपत्र'' नाम्नाऽभिहितं पत्रं नन्दनवनकल्पत-रुनाम्ना गुर्जरेभ्यः अहमदाबादतः प्रकाश्यते यत्र ललितगद्य-काव्य-कथा-मनोरञ्जक-साहित्यादिसामग्री शुद्धमुद्रणाञ्चिता दृश्यते। तदिदं पत्रमपि नैरन्तर्येण प्रकाशमायाति। 34 अङ्का अस्य प्रकाशितचरा इति सूचयन्तः प्रमोदामहे। पाठकानां सूचनायै द्वयोरप्यनयोः पत्रयोः सङ्केतादिकमत्रोद्धरामः (प्रतीकधिया)।

**संस्कृतवाणी** (पाक्षिकम्) सम्पादकः जीवनशर्मा, प्रका. गोविन्दप्रसाद शर्मा, श्री निवाससंस्कृतावद्यापीठम् 174, रामानुज मार्ग, इब्राहीमपुर, दिल्ली 36, सम्पर्क सूत्रम्-09818378284, 9810429487, 8588850551

**नन्दनवनकल्पतरूः** (षाण्मासिकम्) सम्पा. कीर्तित्रयी, सम्पर्क सूत्रम् विजयशीलचन्दसूरि, C/o. अतुल एच. कापडिया, A/9 जागृति फ्लैट्स, महावीर टावर पृष्ठतः, पालडी, अहमदाबाद-7, दूरभाष (079) 26574981, 09978952135

**-प्रधानसंपादकः**

# संस्कृतपत्रकारितामाध्यमेन संस्कृतस्य संरक्षणम्

❑ ममता गुप्ता

पत्रकारिता नाम आधुनिकयुगस्य प्रमुखोपलब्धिः। शब्दानुशासनानुसारेण वार्तानां लेखन–मुद्रण– प्रकाशन–प्रसारणबोधार्थ 'पत्रकारिता' इति शब्दो व्यापकरूपेण स्वीकृतः परञ्च कर्ल.जी.मुगलरः "Modern Journalism" इत्याख्ये स्वकीयग्रन्थे लिखति यत् Journalism- इति शब्दः फ्रेञ्चभाषायाः जर्नीशब्दात् व्युत्पद्यते। जर्नीशब्दस्य अर्थघटनं भवति यत् प्रत्येकमपि दिवसस्य कार्य–विवरणस्य प्रस्तुतीकरणम्। एवं हि वक्तुं शक्यते यत् दैनन्दिनजीवनस्य घटनानां प्रकाशनपराणां पत्राणां संवाहिका भवति पत्रकारिता।

पत्रं करोति तच्छीलमस्य इति विग्रहवाक्ये पत्रशब्दोपपदात् डुकृञ् करणे इत्यर्थकाद् धातोः ''सुप्यजातौणिनिश्ताच्छील्ये'' इति सूत्रेण ताच्छील्यार्थे णिनि– प्रत्ययेऽनुबन्धलोपे पत्र+कृ+इन् इत्यवस्थायाम् ''आर्धधातुकं शेषः'' इत्यनेन सूत्रेणार्धधातुकत्वात् ''अचोञ्णिति'' इति सूत्रेण ऋकारस्य वृद्धावाकारे ''उरण्रपरः'' इति सूत्रेण रपरत्वे कृते पत्र+क्+आर्+ इन् इति जाते प्रकृतिप्रत्ययसंयोगे पत्रकारिणो भाव कर्म वेति विग्रहे ''तस्य भावस्त्वतलौ'' इति सूत्रेण तल्प्रत्यये लकारस्यानुबन्धलोपे पत्रकारिन्+त इति स्थितौ ''नलोपः प्रातिपदिकान्तस्य'' इति सूत्रेण नकारलोपे 'पत्रकारित' इत्यवस्थायां ''तलन्तं स्त्रियाम्'' इति लिंगानुशासनसूत्रेण तलन्तस्य स्त्रीत्वाधिकारेण ''अजाद्यतष्टाप्'' इति सूत्रेण टापि प्रत्ययेऽनुबन्धलोपे पत्रकारित+आ इति जाते ''अकः सवर्णे दीर्घः'' इति सूत्रेण सवर्णदीर्घे 'पत्रकारिता' इति शब्दो निर्मीयते। अस्यार्थो यत् पत्रिकालेखनपठनादिस्वभाववत्तेति।

पत्रकारिता समाचाराणां संकलनमात्रं न विद्यते, अपितु मानवजीवनस्य व्यापकं क्षेत्रं पत्रकारितायां समाविष्टम्। मानवजीवनस्य विविधैः पक्षैः सम्बद्धा पत्रकारिता मानवं समाजेन, समाजं राष्ट्रेण, राष्ट्रञ्च अन्ताराष्ट्रियवृन्देन संयोजयति। राष्ट्रियां भावनामुद्भावयति। कुप्रथा– मुन्मूलयति। अनैतिकतामुत्पाटयति। समाजं नागरिकान् च जागरयति। सत्यासत्ययोः, सुन्दरासुन्दरयोः, शिवाशिवयोः सत्यं विश्लेषणं प्रस्तौति। आधुनिकयुगे पत्रकारिता जनचेतनायाः जनजागृतेश्च सशक्तं साधनं मन्यते। मानवजीवनस्य प्रत्येकमपि क्षेत्रे पत्रकारिता परिव्याप्तास्ति। इदानीन्तु पत्रकारिताविरहितस्य समाजस्य कल्पनापि दुष्करा प्रतीयते। ऊनविंश– शताब्द्याः प्रारम्भे यदा हिन्दीभाषायां पत्रपत्रिकाणां प्रकाशनं प्रारब्धं तदा संस्कृतज्ञा अपि संस्कृते पत्रपत्रिकाणां प्रकाशनाय प्रेरणामलभन्त। तैश्चिन्तितं यत् शतशो वर्षेभ्यः संस्कृतस्याध्यापनं यदवरुद्धं तस्य पुनः प्रसाराय संस्कृतपत्रपत्रिकाणां प्रकाशनं समीचीनः पन्था। एताः पत्रिकाः पाठकान् आह्लादयन्ति। सहृदयानानन्दयन्ति, रसमास्वादयन्ति, नवसर्जन– मुत्प्रेरयन्ति च। अतएव संस्कृतभाषां संरक्षणप्रदानार्थं संस्कृतसाहित्यं प्रकाशयितुं च केचन संस्कृतपण्डिताः विविधसंस्कृतपत्रपत्रिकाणां प्रकाशनं प्रारभन्त। पञ्चाशत् वर्षेभ्यो पूर्वं जयपुरात् मासपत्रिकायाः भारत्याः प्रकाशनाय प्रथमोपवेशने कृते विचारे

बाबासाहेब– आप्टेमहोदयोऽभाषत– अस्माकमुद्देश्यं वर्तते सर्वसाधारणेषु संस्कृतभाषायाः प्रचारः प्रसारश्च स्यादिति। अतः भारत्यां ये लेखाः कथाः निबन्धाः प्रकाशिताः स्युस्तेषां भाषा सरला बोधगम्या च भवेत्। एतेन छात्राणां कृते संस्कृतशिक्षणमपि सरलया संस्कृतभाषया सुकरं भविष्यति। अस्मिन् क्रमे एव 'शारदा' पत्रिकाऽपि संस्कृतभाषायाः प्रचारे प्रसारे च नितान्तं सफलाभूत्, यथा–

''प्रसारय संस्कृतध्वजम्। प्रताडय संस्कृत–दुन्दुभिम्। प्रपूरय संस्कृतशंखम्। पठ संस्कृतम्। वद संस्कृतम्। लिख संस्कृतम्।'' (शारदा 1.1)

बद्धपरिकराः संस्कृतपत्रिकाः गीर्वाणवाणीगौरव–वर्धनाय अमरत्वसाधनाय च। सुरभारत्याः संरक्षणमपि पत्रिकाभिर्विधीयते। पं. कृष्णलालशुक्लस्य 'स्वरमंगला' इति पत्रिकायाः पद्यमेकमत्र प्रस्तूयते–

''यस्यां ज्ञाननिधिः शिवाय जगतः संस्थापितः सूरिभिः सा शब्दामृतवर्षिणी मधुवनी रक्ष्या बुधैर्भारती।'' (स्वरमंगला वर्ष–11, अंक–2)

अनन्तरम्, विद्यावाचस्पतिः अप्पाशास्त्रिरा–शिवडेकरः साप्ताहिकपत्रिकामेकां सम्पादयति स्म, यस्याः नामासीत्– 'सूनृतवादिनी'। संस्कृतभाषां प्रति सर्वसाधारणभारतीयानामभिरुच्युत्पादनाय सरलया भाषया संस्कृतसाहित्यस्य अनुपमनिधेश्चा–स्वादनमस्याः प्रधानमुद्देश्यम्। यथा–

''अपरं हि वैभवं भारतीयानां संस्कृतभाषा अथवा प्राणा एवेयमेतेषाम्। ज्ञानमयाः हि प्राणाः। यच्च भारतीयानां ज्ञानं तदेतत् संस्कृतभाषयैव संघटितम्। तेषामेव हि कृते सेयं सूनृतवादिनी प्रकाश्यते ये किल सर्वाङ्गीणमेतस्याः प्रचारमभिवाञ्छन्ति। येषां च संस्कृतमेवैका भारतीयानां भाषा भवत्वित्यभिप्रायः।'' (सूनृतवादिनी 1.5)

इत्थं संस्कृतपत्रपत्रिकामाध्यमेन संस्कृतभाषा संरक्षणं प्राप्नोति। संस्कृतपत्रकारिता इतरभाषाणाम–पेक्षया किञ्चित् विशिष्टं महत्त्वमावहति। संस्कृतपत्र– पत्रिकाणां माध्यमेनैव अद्यापि कन्याकुमारीतो हिमालयं यावत् भारतं सांस्कृतिकम् आध्यात्मिकं भौगोलिकं च ऐक्यमनुभवति। सर्वेषु राज्येषु संस्कृतं पठितं लिखितं मुद्रितं प्रकाशितं च सत् व्यवहृतम् अभिलक्ष्यीक्रियते यतोहि एतत् अमृतं वर्तते। 'संस्कृतम्' पत्रस्य मुखपृष्ठे लिखितं यत् देववाणी नास्ति मृतभाषा। संस्कृतभाषाद्यापि जीवति, यथा–

**यावद् भारतवर्षं स्याद् यावद् विन्ध्यहिमाचलौ।।**
**यावद् गंगा च गोदा च तावदेव हि संस्कृतम्।।**

अतएव संस्कृतेनैव भारतीया संस्कृतिः सुरक्षिता स्थास्यति। विदेशेष्वस्माकं सम्मानः संस्कृतवाङ्मयेनैव गौरवपूर्ण सुप्रतिष्ठितमः सम्प्रति भारतीयसंस्कृतेः समधिको ह्रासः समवलोक्यते। यदि भारतीयां संस्कृतिं रक्षयिष्यामस्तर्हि विपुलसंख्यायां संस्कृतपत्रिकाः प्रकाशनीयाः। संस्कृते पत्रपत्रिकाणां यदि प्रकाशनं प्राचुर्येण भविष्यति तर्हि ये केचन स्वल्पमपि संस्कृतं जानन्ति ते पत्रपत्रिकामाध्यमेन संस्कृतं पठिष्यन्ति। स्वसंस्कृत्या परिचिता भविष्यन्ति तेषु राष्ट्रगौरवं वर्धिष्यते। इत्थं संस्कृते यानि पत्राणि प्रकाशितानि भवन्ति तेभ्यः संस्कृतस्य प्रचारे प्रसारे सुमहान् सहयोगः संजायते।

शोधार्थिनी,
डॉ0 भीमराव अम्बेडकर राजकीय स्नातकोत्तर
महाविद्यालयः, श्रीगंगानगरम् (राजस्थानम्)

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### चम्पूकाव्यकारः सोमदेवः, भोजराजः सोढ़लः अनन्तभट्टः विक्रमभट्टश्च

सोमवदेवः श्रुतो भोजराजश्श्रमी,
सोढ्ढलानन्तभट्टाभिधोविक्रमः।
चम्प्वलङ्कारभूता अमी लेखका,
हा कथं भारते भारती आहता।। 169।।

### विष्णुशर्मकृतकथाकाव्यं पञ्चतन्त्रम्

विष्णुशर्मा पटू राजनीतौ दमी,
संलिलेख प्रकृष्टं तमी वक्रधीः।
दुष्कृतां पञ्चतन्त्रं बटूनामिदं,
भारते आहता भरती हा कथम्।। 170।।

### बालमनोविज्ञानी विष्णुशर्मा

बालवैज्ञानिकोऽसौ कथाकृद्यमी,
ज्ञानिनो बालकाः सम्भवेयुर्यथा।
तत्कृते तेन तन्त्रं धिया निर्ममे,
आहता हा कथं भारती भारते।। 171।।

### पञ्चतन्त्रे तिर्यक्कथाव्रातः

पञ्चतन्त्रे तिरश्चां कथानाञ्चयो
मन्त्रमुग्धं विधत्तेऽद्य विद्यावताम्।
गाहते ज्ञानराशौ मनश्शाश्वतं,
भारते आहता भारती हा कथम्।। 172।।

### बालिशोऽपि पञ्चतन्त्रपिपठिषुः विद्वान् भवति

बालिशो यस्य बोधेन बालो बुधो,
नीतिरीतिप्रभाहेतु तन्त्रं हि तद्।
जायते नीतिकारो ध्रुवंसत्पपथी।
आहता भारते हा कथम् भारती।। 173।।

### हितोपदेशकर्ता पण्डितनारायणः

सत्कविर्नीतिबोधेषु नारायणश् –
चोपदेशं हितस्यानु विष्णुं कविम्।
संल्लिलेखाशु रत्नोपमं पुस्तकं,
भारते आहता भारती हा कथम्।। 174।।

बन्धरत्नं स्वकीयैर्गुणैर्नन्दयद्,
बोधवृद्धिं विधत्तेऽबुधानामिदम्।
दुर्जनं प्रेरयच्चानिशं सत्पथम्,
आहता भारते भारती हा कथम्।। 175।।

### कथाकाव्यकृत् सोमदेवः स्वामी च

स्वामिनामा विशालां कथां निर्ममे,
सागरं सोमदेवस्सुचक्रे बुधाम्।
चेतसञ्चाद्य बध्नाति बन्धद्वयं,
भारते आहता भारती हा कथम्।। 176।।

### व्याकरणशास्त्राविष्कारः

शब्दसाधुत्वकारिप्रवृत्तिप्रदं,
व्याकृतञ्चार्थवृत्तौ महाकारणम्।
ब्रह्मणश्चागतं निर्जराणां गुरुम्,
आहता भारते भारती हा कथम्।। 177।।

### व्याकरणव्याकर्ता देवराजेन्द्रः

देवराजन्ततश्चाप्तवाचस्ततो,
भूसुरञ्चेति तच्छब्दशास्त्रं पुनः।
मध्यतो व्याकृतास्तेन शब्दा अमी,
आहता हा कथं भारते भारती।। 178।।

## देवत्वनिर्मातृ व्याकरणसम्प्रदायद्वयम्

सम्प्रदायद्वयं ब्राह्मणं धौर्जटं,
प्रत्नव्यप्रभेदाच्छुतं व्याकृतम्।
चास्य पाठोऽपि देवत्वदायी नरम्,
आहता भारते भारती हा कथम्।। 179।।

## ऐन्द्रादिव्याकरणं सूत्रकारः पाणिनिश्च

इन्द्रचन्द्रादयो विश्रुता व्याकृतौ,
पाणिनिस्सूत्रकारो महाशाब्दिकः।
तस्य मेघान्नमामो वयं मैथिला,
हा कथं भारते भारती आहता।। 180।।

## विश्वव्याकरणशिरोमणिः तथा शब्दवैज्ञानिकपाणिनिः

सूत्रजालं विशालङ्कृतन्तेन तत्,
येन चास्तं चिरं संस्कृतं सुमहत्।
तं नमो वयं शब्दवैज्ञानिकम्,
आहता भारते भारती हा कथम्।। 178।।

## पुनः पाणिनि-उत्पत्ति-याचना

या ह्यसूतेदृशन्तोककं पाणिनिं,
ताञ्च वन्दामहेऽहर्निशं मातरम्।
याच ईशं पुनः पाणिनिं संस्कृते,
हा कथं भारती आहता भारते।। 182।।

## व्याकरणभाष्यकृत् पतञ्जलिः

भाष्यकृद्योगशास्त्रं सुचक्रे महा -
भाष्यकञ्चापि योगी सुशैल्या नवम्।
व्याकृती रोचते शब्दिकेभ्योऽनिशम्,
आहता भारती भारते हा कथम्।। 183।।

## वार्तिककारः कात्यायनिः वार्तिकलक्षणञ्च

वार्तिकं निर्ममौ यस्तु कात्यायनो,
वक्त्यनुक्तं द्विरुक्तं धियोक्तञ्च यत्।
भ्राजते तस्य वाग्भिश्च तत्संस्कृतम्,
आहता भारती भारते हा कथम्।। 184।।

## सूत्रभाष्यवार्तिकनद्धं व्याकरणम्

शब्दजालं चकास्ते महद्धर्मदं,
सज्जितं सूत्रकैः वार्तिकैः वर्धितम्।
भाष्यनद्धं सुबद्धं प्रभूतं प्रियम्,
आहता भारती भारते हा कथम्।। 185।।

## काशिका तट्टीका मंजरीन्यासद्वयी

काशते व्याकृते सर्वतः काशिका,
सन्द्यति ग्रन्थिजन्यासटीका तमो।
मञ्जरी शब्दगन्धप्रसारेरता,
हा कथं भारती भारते आहता।। 186।।

## काशिका प्रशंसा

भास्वरेन्दुप्रभेवाशु खद्योतिका,
काशिका खे यदा कौमुदी किं तदा।
द्योतते श्रेष्ठविद्याभृतां संसदि,
हा कथम् आहता भारती भारते।। 187।।

जागृहि द्राक्सखे धेहि भो काशिकां,
भारतीभालिकामद्भुतां सारलीम्।
मौक्तिकाभूषणीभूतमालां गले,
आहता हा कथं भारती भारते।। 188।।

-राजकीयश्रीकल्याणमहाविद्यालय, सीकर

# दीपावलीमहोत्सवः

- अंजना शर्मा ( व्याख्याता )

उत्सवशब्दोऽयं कियान् मधुरतमः। अस्य खलु प्रतीक्षा अपि जनानां मनांसि वसन्तवायुः इव बलात् आन्दोलयति। यस्य आगमनम् आबालवृद्धं सर्वेषां हृदयपटलानि उत्साहतरङ्गपूर्णानि विदधाति। अस्माकम् इन्द्रियाणि च आनन्दसरितस्तटे स्थापयति। इदमेव उत्सवस्य परममाधुर्य-कारणम्। अद्यत्वे खलु इन्द्रियाणां तृप्तिम् एव परमस्य सुकृतस्य फलं मन्यते लोकः। उत्सवस्य दिवसे च सुस्वादुभोजनैः नवीनवस्त्रधारणैः चित्ताकर्षकैः दृश्यैः वाद्यगायनादिभिश्च प्रायशः सर्वेषाम् एव इन्द्रियाणां परितोषो भवति। ततः खलु उत्सवशब्दे माधुर्यरसानुभूतिं, तत्प्रतीक्षायां च स्वाभाविकीम् उत्कण्ठाम् को नाम न स्वीकुर्यात्।

दीपावलीमहोत्सवः तासाम् एव मधुराणामाशानां मुख्यः केन्द्रभूतः। गोवर्द्धनपूजया यमद्वितीयया च अस्य उत्सवस्य आनन्दकलेवरं परिपुष्टं दीर्घकालस्थायि च संजातम्। उत्सवदोलायां सुखमासीनाः जनाः अल्पकालं सञ्चितानि दुःखानि सर्वथा विस्मरन्ति।

कार्तिकमासस्य अमावस्यायाम् परमपूतायाः अतिप्राचीनतमायाश्च भारतीयसंस्कृतेः प्रतीकोऽयं महोत्सवः प्रतिवर्षं समायाति। धार्मिकदृष्ट्या 'श्री महालक्ष्मीपूजनम्' एव उत्सवस्य मुख्यम् उद्देश्यम्। नाना-प्रकारैः व्यञ्जनैः, पुष्पफलादिबहुलैः उपकरणैः परमया श्रद्धया च लोकाः क्षीरसागरनिवासिनीं श्रीमहालक्ष्मीं पूजयन्ति। लक्ष्मीपूजायां लोकसाधारणस्य प्रवृत्तिः स्वाभाविकी एव। पृथ्वीलोकस्य मर्यादापालने यावत् साहाय्यं प्रत्यक्षतः लक्ष्मीदेवता प्रददाति तस्य दशमांशमपि नान्या देवता।

भारतीयस्य धर्मस्य इयं विशिष्टता वर्तते, यत् अस्य धर्मस्य मूले किमपि वैज्ञानिकं रहस्यं अवश्यं भवति। तत् वैज्ञानिकं रहस्यं च धर्मपटेन आवृतं भवति। भारतीया धर्मप्राणजनता तत् रहस्यम् अनभिज्ञाय केवलं धर्मार्थम् एव महता समादरेण तम् उत्सवं समभिनन्दति। किन्तु विज्ञानप्रधानेऽस्मिन् युगे तदपि रहस्यं अवश्यं ज्ञातव्यम्। दीपावलीविषये सामान्यतः इदम् एव रहस्यं प्रतीयते यत् वर्षासु निरन्तरं जलवर्षणेन सूर्यप्रकाशन्यूनतया च सर्वाणि भवनानि आर्द्राणि भवन्ति, तेषु कृमिकीटादयः उत्पद्यन्ते, तत्रत्यो वायुः अपि दूषितो भवति। दीपावल्या अवसरे वर्षर्तुः समाप्तो भवति। ततश्च जनाः वर्षाजनितं विकारं दूरीकर्तुं स्वस्वभवनानि पूर्णरूपेण स्वच्छानि कुर्वन्ति, सुधया धवलयन्ति, प्रतिभवनं च दीपमालया प्रकाशयन्ति, स्फुलिङ्गवर्षणानि क्रीडनकानि च प्रज्वालयन्ति। एभिः उपायैः वर्षाभवा विकृतिः नश्यति। एवम् उत्सवोऽयं जनानां परमोपयोगी भवति।

ऐतिहासिकी पृष्ठभूमिः अपि अस्य महत्वशीला वर्तते। अस्मिन् पुण्यपर्वणि एव महान्तो विभूतिमन्तो जनाः स्वकीयजन्मना भारतभुवम् अलंकृत्य स्वीयजीवनदीपस्य अमरशिखया अमुं दीपावलीमहोत्सवं चिरकालं द्योतयामासुः। यस्य रामराज्यस्य कल्पनया अपि आधुनिकसमाजनेतृणां मनोमयूरा नृत्यन्ति स्वप्रजारक्षणे च यस्य एतादृशः सिद्धान्तः आसीत् यत् -

**'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा'। इति**

एवमादर्शराज्यव्यस्थापकं मर्यादापुरुषोत्तमं भगवन्तं श्रीरामचन्द्रं को न जानाति। सोऽयं भगवान् रामचन्द्रः लोकमर्यादाविनाशकं राक्षसं रावणं निहत्य दीपावल्यामेव स्वराजधानीम् अयोध्यां प्रत्याजगाम। तथाभूतस्य भगवतः श्रीरामचन्द्रस्य एकान्तभक्तः बलाधिष्ठातृदेवः श्रीहनूमानपि दीपावलीपर्वणि एव स्वजन्मना भारतं भूषयामास। त्यागिनां मूर्धन्यतमाः तपस्विनां श्रेष्ठाः आध्यात्मिकज्ञानवतां च आदर्शभूताः स्वामिनः रामतीर्थमहाभागाः अस्मिन् एव दिने भुवं समलञ्चक्रुः विस्तृतवेदज्ञानम्-आर्येषु पुनः-पुनः उद्बोध्य स्वामी दयानन्दसरस्वतीमहाभागः भारतभुवं विरहय्य दीपावलीनक्षत्रैः सह अस्तं जगाम। आग्नेयास्त्रसज्जितान् विपुलसङ्ख्याकान् आङ्गलदेशीयान् या अल्पया सेनया असिमात्रेण शस्त्रेण च नितान्तं पराङ्मु खान् चकार, यस्याः वीरतायाः प्रशंसां वैरिणः अपि मुक्तकण्ठं चक्रुः प्रसिद्धा सा रमणी झांसी-महाराज्ञी 'लक्ष्मीबाई' अपि स्वजन्मना दीपावलीशोभाम् एव द्विगुणितां अकरोत्। नेताजी श्री सुभाषचन्द्रबोसेनापि विश्वप्रसिद्धस्य 'आई-एन.ए' इति नाम्ना प्रख्यातस्य सैनिकसंघटनस्य प्रतिष्ठापनमपि अस्मिन्नेव शुभावसरे कृतम्।

श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर

# स्वातन्त्र्यपूर्व ब्रिटिश न्यायपालिकायाम् भारतीय– धर्मशास्त्रोपदिष्टः व्यवहाराध्यायः

– डॉ. दिलीपकुमार नाथाणी

वि.स. १८१४ (ईस्वीसन् १७५७) तमे वर्षे प्लासी नामक स्थाने एकं निर्णीतं युद्धम् अभवत्। युद्धं भारतीय–स्वतन्त्रतायै कृते घातकम् आसीत्। अनेन ईस्ट इण्डिया कम्पनी नामक व्यापारिक संस्थायाः महत्त्वाकांक्षा वर्धिता। तत्र मीरजाफरम्लेच्छस्य राष्ट्रद्रोहिकर्मणा बंगाल आँग्लम्लेच्छानां हस्तगतोऽभवत्। इतः पूर्व १८३१ तमे वैक्रमाब्दे (ईस्वी सन् १७७४) बंगाल–प्रान्तस्य प्रधान (गवर्नर जनरल) वारेन हेस्टिंग्स अभवत्।

एषः वारेन हेस्टिंग्स महोदयः सर्वान् आँग्लवासिनः संस्कृत–प्रशिक्षणाय प्रेरितवान्। सोऽमन्यत यत् भारतीय जनान् भारतीय–विधि–व्यवहार–नियमानुसारमेव प्रशासयितुं शक्यते। हेस्टिंग्स महोदय एतदपि जानाति स्म यत् भारतीयपरिप्रेक्ष्ये बृटिश विधिसूत्रणि सर्वथा अनुपयोगीनि सन्ति । अतः हेस्टिंग्स महोदयः मुख्यन्यायाधीशं प्रति एकं पत्रम् अलिखत्। पत्रे सः स्पष्टीकृतवान् यत् भारतीयानां कृते न्यायव्यवस्था अन्यदेशीय–नियमानुसारेण न भवेत्। हेस्टिंग्स पत्र एतत् अपि वर्णितं यत् भारतीयाः आर्या ये अत्र भारतस्य मूलनिवासिनः सन्ति ते लिखित–संविधानतः भिन्नाः सन्ति । ते स्वकीयापूर्वव्यवहार–विधि–सूत्राणि प्रति अपरिवर्तनीयां भावनां धारयन्ति। भारत देशस्य आर्यजनाः स्व संविधानं प्रति पूर्णश्रद्धायुक्ताः अपि सन्ति। वारेन हेस्टिंग्स महोदयः संस्कृतज्ञविद्वत्–पण्डितानाम् एकां परिषद निर्मापितवान्। समित्याः सर्वेसदस्याः संस्कृत, पारसी च द्वयोः भाषयोः ज्ञातारः आसन्। प्रथमं तैः संस्कृते व्यवहार–संहिता लिखिता। पुनः तस्य मूलसंस्कृतविधिसंहितायाः पारसी भाषायाम् अनुवादम् अकुर्वन्।

समित्याः सदस्याः आसन्–

(१) पण्डित रामगोपाल न्यायालंकारः (२) पण्डित वीरेश्वर पंचाननं (३) पण्डित किशन जे न्यायालंकारः (४) पण्डित बाणेश्वरः विद्यालंकारः (५) पण्डित गौरीशंकर तर्कसिद्धान्ती (६) पण्डित किशन केशव तर्कालंकारः (७) पण्डित सीताराम भट्टः (८) पण्डित कालीशंकर वेदज्ञः (९) पण्डित श्यामसुन्दर न्यायसिद्धान्ती।

स्वतन्त्रतापूर्वं भारत देशस्य आधुनिक न्यायव्यवस्थायै एषा प्रथमा विधिसंहिता आसीत्। एषा संहिता मनुस्मृति, नारदस्मृति, बृहस्पतिस्मृति, याज्ञवल्क्यस्मृति आदि स्मृतिषु एवं च व्यवहारमयूख, वीरमित्रोदय, स्मृतिचन्द्रिका प्रभृति निबन्धग्रन्थेषु आधारिता आसीत्। अस्याः समित्याः विद्वद्भिः बहवः विधिसम्बन्धी संस्कृतग्रन्थाः पारसी भाषायाम् अनूदिताः येषु प्रमुखाः आसन् मन्वादिस्मृतयः व्यवहार मयूख, वीरमित्रोदयस्य व्यवहाराध्याय आदयः।

न्यायव्यवस्थोपरि लिखितप्रथमविधिसंहितायाः प्रथमतः पारसीभाषायाम् अनुवादः संजातः। तदुपरान्तम् अस्य पारसी– अनूदित– संहितायाः, पुनः आँग्ल अनुवादोऽभवत्। अस्याः संहितायाः आँग्ल अनुवादक नेथियल हाल्हेड आसीत्। इत्थम् आँग्लभाषायाम् अनूदित संहिताया नामः THE GENTOO LAW OR ORDINATIONS OF PUNDITS आसीत्। एषा संहिता ब्रिटिशकालीनभारतीयन्याय–व्यवस्थायाः प्रथमा विधिसंहिता आसीत्। वारेन हेस्टिंग्स महोदयेन १८२९ वैक्रमाब्दे (ईस्वीसन् १७७२) आधिकारिकिरूपेण एषा संहिता संविधानरूपेण स्वीकृता। एवं च भारतीयानां कृते ब्रिटिश भारतीय न्यायालयेषु एषा संहिता न्याय–संहिता रूपेण स्वीकृता। अत्र वारेन हेस्टिंग्स महोदय मुख्यतः त्रीन् बिन्दून् केन्द्रीकृत्य संविधानस्य क्रियान्वयनं कृतवान्–

(१) हिन्दूबाहुल्ये भारते हिन्दूधर्मशास्त्राधारितनियमा अंगीकृताः।

(२) ब्रिटिशन्यायालये शब्दनिर्वचनार्थं पण्डितानां नियुक्ति भवेत्। ते पण्डिताः तत्र न्यायाधीशानां समक्षे विधिपरकशब्दानां निर्वचनं प्रस्तुवन्ति स्म।

(३) न्यायालयेषु वादसंख्यावृद्धायर्थं न्यायालयेषु पण्डितानां नियुक्तिः जनान् आकर्षयिष्यति।

इत्थम् वि.सं. १८२९–१९२१ (ईस्वी सन् १७७२–१८६४) पर्यन्तं न्यायालयेषु आँग्ल विद्वद्भिः (अँग्रेजी ज्यूरी) सह हिन्दू पण्डितानां नियुक्तिरावश्यकी आसीत्।

१९१४ वैक्रमाब्दे (ईस्वी सन् १८५७) स्वातन्त्र्यसमरोऽभवत्। तदुपरान्त आर्यावर्ते व्यापारिकसंघटनस्य (ईस्ट इण्डिया कम्पनी) शासनं विरमितम्। एवं सम्पूर्ण शासन ब्रिटानिया संघस्य अधीनमागतम्। वि.सं. १९२१ (ईस्वी सन् १८६४) तः नव–विधि–प्रणाली आरब्ध यत्र पण्डितानाम् अनिवार्यता समाप्ता जाता। अत्र धर्मान्तरणकारी संस्थानाम् कुटिला भूमिका आसीत्।

हेस्टिंग्स महोदयः द्विविधां न्यायालयव्यवस्थायम् अकरोत्। प्रथमं तावत् आयकरन्यायालयः (रेवेन्यू कोर्ट) द्वितीयञ्च सामान्य– न्यायालयः (सिविल कोर्ट)। हेस्टिंग्स एव जनपदाधीशाय (जिलाधीशः) न्यायाधिकारम् अददात्। हेस्टिंग्स महोदयेन स्वानुभवेन ज्ञातं यत् आर्याः स्वधर्मशास्त्राणाम् प्रति अत्यन्तम् आस्थावान्तः सन्ति। अतः यदा न्यायालयेषु आँग्ला न्यायाधिकारिणः हिन्दूधर्मशास्त्रीय विध्यनुसारं न्यायं करिष्यन्ति तथा तैः दत्तनिर्णयानां सर्वत्र प्रशंसा समादरश्च भविष्यति। अतः हेस्टिंग्स स्वकार्यकाले निष्ठापूर्वकं न्यायालये हिन्दू–विधिम् अनुपालितवान्। व्यापारिकसंघटनस्य (ईस्ट इण्डिया कम्पनी) वरिष्ठाः अपि हेस्टिंग्स महोदयस्य निर्णयं स्वीकृतवन्तः।

श्रीमान् कालब्रुक अस्मिन् ब्रिटिश व्यापारिक संगठने (ईस्ट इण्डिया कम्पनी) एकः संस्कृतज्ञः आसीत्। अनेन महोदयेन भारतीय विधिसूत्राणि तकनीकिस्वरूपे परिवर्त्य ब्रिटिशभारतीयन्यायालयेषु स्थापितानि। अस्ति विस्तृत भू–प्रदेशः भारतीयप्रायद्वीपस्य। तस्मात् विधिशब्दानां निर्वचनाय अतिसूक्ष्मं–अन्वेषणदृष्टिः अपेक्षिता अस्ति। कालब्रुकमहोदयः द्विविधां विधि–शैलीं विकसितवान्। यत्र पितृपक्ष विभाजनं, गौत्रविभाजनञ्च, एतयोः जन्मत उत्तराधिकारिता आदयः विषयाः उल्लिखिताः आसन्। कालब्रुक कथयति यत् नारद, बृहस्पति, मन्वादि स्मृतयः तासां उपरिलिखिताः टीकाः अन्याश्च व्यवहार– मयूखाः आदयः निबन्धग्रन्थाः हिन्दूविधिशास्त्राणि सन्ति।

१८४० वैक्रमाब्दे (ईस्वी सन् १७८३) जान विलियम कलकत्ता उच्च न्यायालयस्य न्यायाधीशो नियुक्तः। सोऽपि पारसी–अरबीभाषयोः ज्ञाता आसीत्। एवञ्च सः भारतीयविधिग्रन्थस्य पारसी अनूदित संहितायाः अध्ययनं कृतवान्। सः स्वयं संस्कृतभाषायाः अध्ययनम् अकरोत्। पुनः मूलं विधिग्रन्थं पठित्वा तेन ज्ञातं यत् ग्रन्थानां सटीक व्याख्यया एव ब्राह्मणाः भारतीयसमाजे पूजनीयाः सन्ति। अतः तस्य मनसि ब्राह्मणाय द्वेषो जातः। सः प्रयत्नशीलो अभवत् यत् भारतीय– समाजे यथा ब्राह्मणाः पूजनीयाः सन्ति तथैव ब्रिटिश व्यापारिक संघटनम् (ईस्ट इण्डिया कम्पनी) अपि भवेत्।

शोधार्थी, जयनारायण व्यास विश्वविद्यालयः, जोधपुरम्

नारी-स्तम्भः

# गुणान्वितासु नित्यं वसामि

- डा. राजेश्वरी भट्ट



भारतदेशे नारी लक्ष्म्याः प्रतिमूर्तिरिव सम्मान्यते। कन्या-पत्नी-माता इति तिसृष्ववस्थासु नारी लक्ष्मीरिव अभिनन्दनीया वर्तते। कन्याजन्मसमये परिजनाः परिचिताः समागताश्च 'गृहे लक्ष्म्या आगमनं जातम्' इति कथयित्वा हर्षोद्गारान् प्रदर्शयन्ति। विवाहानन्तरे नववधू-रूपे नारी पतिगृहं प्रविशति तदा तस्याः गृहप्रवेशो लक्ष्म्याः प्रवेशवत् महता समारोहेण सभाज्यते। एवमेव यदि गृहे कस्यापि महिलाया निधनं भवति तदा गृहलक्ष्मीं विना गृहं शून्य- मिव प्रतिभाति इति कथयित्वा सम्बन्धिनः सहृदयाश्च शोकं प्रदर्शयन्ति। अनेन स्पष्टमस्ति यत् निःसन्देहं नारीषु लक्ष्मी स्वयं निवसति। किन्तु सर्वासु नारीषु लक्ष्म्या निवासोऽस्ति अथवा विशिष्टगुणसम्पन्नासु नारीषु लक्ष्म्या निवासो वर्तते। इति जिज्ञासमाना, कृष्णस्य सन्निधावुपविष्टा, देवी-रूक्मिणी लक्ष्मीमपृच्छत् यत् सा कीदृशीषु नारीषु चिरस्थितिं करोति काश्च विहाय गच्छति। लक्ष्म्या वचनैर्ज्ञार्यते यत् या नार्यो गृहस्य पर्यावरणपरिवेशयोः स्वच्छतायै सावहिता भवन्ति, देव-द्विज-अतिथीनां सेवायै तत्पराः सन्ति, भाण्डानि स्वच्छीकुर्वन्ति। गोसेवायै समर्पिता वर्तन्ते। तासु नारीषु लक्ष्मीः सदा वसति।

कथितञ्च-**वसामि स्त्रीषु कान्तासु, देवद्विजपरासु च।**
**विशुद्धगृहभाण्डासु, गोधान्याभिरतासु च।।**

महाभारत अनुशासन पर्व

लक्ष्मीः सत्यवादिनीनां नारीणां चिरसहचरी वर्तते। सौम्यदर्शनयुक्तासु, समुचितवेशभूषाभूषितासु, भर्तुर्मनो-वृत्तानुसारिणीषु अनेकगुणान्वितासु नारीषु लक्ष्म्याः चिरनिवासो भवति। कथितञ्च -

**सत्यासु नित्यं प्रियदर्शनासु सौभाग्ययुक्तासु गुणान्वितासु।**
**वसामि नारीषु पतिव्रतासु, कल्याणशीलासु विभूषितासु।।**

महाभारतअनुशासनपर्व

लक्ष्म्यै गृहकार्याण्युपेक्षयन्ती स्वच्छतां प्रति उदासी-ना, अव्यवस्थिताचारव्यवहारविचारयुक्ता, भर्तुर्हितमव-धीरयन्ती, अविचार्य एव कर्मसु प्रवृता-निरूद्देश्येन यत्र तत्र अटन्ती नारी कथमपि न रोचते। अस्मिन् प्रसंगे लक्ष्म्या कथितानि वचनानि द्रष्टव्यानि सन्ति।

**प्रकीर्णभाण्डामनवेक्षकारिणीं, सदा च भर्तुः प्रतिकूलवादिनीम्।**
**परस्य वेश्माभिरतामलज्जा-मेवंविधां तां परिवर्जयामि।।**

महाभारत, अनुशासन पर्वअध्याय।।

लक्ष्मीः ताभ्यो दुर्गुणयुक्ताभ्यो नारीभ्यो दूराद्-दूरतरं गच्छति याः पापकर्मसु लिप्ता, बहुभक्षिण्यो, धैर्यविहीनाः कलह प्रियाः निद्रया गृहीताः सन्ति। कथितञ्च -

**पापामचोक्षामवहेलिनीं च, व्यपेतधैर्यां कलहप्रियां च।**
**निद्राभिभूतां सततं शयाना-मेवंविधां तां परिवर्जयामि।।**

महाभारत, अनुशासन पर्वअध्याय।।

लक्ष्मीपूजनमहोत्सवे सुख, समृद्धि-सौभाग्य-कांक्षिणीभि: नारीभि: लक्ष्म्या: पूजनेन सह तस्या मुखनिर्गतानि अमृतमयवचनान्यपि स्मरणीयानि। श्रेयस्कराणि वचनानीमानि युगयुगेभ्य: प्रेरणाप्रदानि सति।

हिन्दी- भारतदेशें में नारी लक्ष्मी की प्रतिमूर्ति की भाँति सम्मानित है। कन्या, पत्नी, माता इन तीनों रूपों में ही नारी लक्ष्मी के रूप में अभिनन्दनीय है। कन्या के जन्म होने पर परिजन, परिचित एवं समागत जन 'घर में लक्ष्मी का आगमन हुआ है' ऐसा कहते हुए अपने हर्षोंदगार प्रकट करते है। विवाह के पश्चात् जब नववधू पति के साथ घर में प्रवेश करती है तब पति के घर में उसका गृह प्रवेश लक्ष्मी के प्रवेश के समान बड़े समारोह के साथ सम्पन्न किया जाता है। इसी प्रकार यदि घर की किसी महिला की मृत्यु हो जाती है तो 'गृह लक्ष्मी के बिना घर सूना हो गया' ऐसा कहकर परिजन अपना शोक प्रकट करते हैं। इससे स्पष्ट ज्ञात होता है कि नि:सन्देह नारियों में लक्ष्मी का निवास है। किन्तु सभी नारियों में लक्ष्मी निवास करती है अथवा विशिष्टगुण सम्पन्न नारियों में लक्ष्मी का चिर निवास है तथा किन स्त्रियों को छोड़कर वह पलायन कर जाती है। इस बात को जानने की इच्छुक श्रीकृष्ण के समीप बैठी हुई देवी 'रूक्मिणी जी' ने लक्ष्मी जी से पूछा कि वे किन स्त्रियों में सदा निवास करती है तथा किन को छोड़कर चली जाती हैं। लक्ष्मी के वचनों से ज्ञात होता है कि वे उन नारियों में ही सदा निवास करती है जो नारियाँ गृह के पर्यावरण तथा परिवेश की स्वच्छता के प्रति सचेत हैं, देव, ब्राह्मण एवं अतिथियों की सेवा में तत्पर रहती हैं, घर के बर्तनों को स्वच्छ रखती हैं, गो सेवा के लिए तत्पर हैं। ऐसी नारियों में ही लक्ष्मी का सदा निवास है। कह भी गया है - मैं सुन्दर स्त्रियों में, देवता ब्रह्माण एवं अतिथियों के सत्कार में समर्पित घर के बर्तनों को शुद्ध रखने वाली तथा गाय की सेवा, धान्य की रक्षा करने वाली स्त्रियों में सदा निवास करती हूँ।

महाभारत अनुशासन पर्व ।। अध्याय

लक्ष्मी सत्यवादिनी नारियों की सहचरी है। सौम्य दर्शनयुक्त, समुचित वेशभूषा से भूषित अपने पति के अनुकूल रहने वाली तथा अनेक गुणों से युक्त कल्याणकारिणी स्त्रियों में लक्ष्मी सदा-निवास करती है।

महाभारत अनुशासन पर्व ।। अध्याय

घर के कार्यों की उपेक्षा करने वाली, स्वच्छता के प्रति उदासीन, अव्यवस्थित आचार विचार व्यवहार वाली पति के हित को न समझने वाली, बिना विचारे कार्यो में प्रवृत्त होने वाली, बिना उद्देश्य इधर उधर भटकने वाली नारी लक्ष्मी को तनिक भी पसन्द नहीं है। इस प्रसंग में लक्ष्मी स्वयं कहती है -

घर के बर्तनों को अव्यवस्थित रखने वाली, पति के प्रतिकूल चलने वाली, लज्जाहीना, बिना कार्य इधर-उधर घूमने वाली नारी को मैं छोड़ देती हूँ।

महाभारत अनुशासन पर्व अध्याय।।

लक्ष्मी दुर्गणों से ग्रस्त उन नारियों के दूर चली जाती है जो पापकर्म में लिप्त हैं चटोरी हैं, धैर्य विहीना हैं, क्लेशकारिणी एवं निद्रा के वशीभूत हैं कहा भी गया है।

पाप में प्रवृत्त, चटोरी, विगत धैर्या कलहप्रिया निद्रा से गृहीत लक्षण वाली नारियों को मैं त्याग कर चली जाती हूँ।

महाभारत अनुशासन पर्व अध्याय।।

लक्ष्मी पूजन महोत्सव पर सुख, समृद्धि एवं सौभाग्य की कामना करने वाली नारियों को लक्ष्मी के पूजन के साथ-साथ उनके मुख से निकले हुए अमृततुल्य वचनों का भी स्मरण करना चाहिए। लक्ष्मी द्वारा कहे हुए कल्याणकारी वचन युगयुगों तक प्रेरणादायी है।

तिलकनगर, जयपुर

आयुर्वेद स्तम्भः

# धाराधरात्यये कार्यम्

- प्रो. बनवारीलाल गौडः
पूर्व-कुलपतिः

**धाराधरात्ययेऽतन्द्रः चन्द्रः हंस इवाभाति व्योमतलं जलमिव विमलाश्च तारकाः कुमुदानीवाभान्ति, किन्तु सर्वमिदं शरदः शुक्लपक्षस्य रात्रावेव, दिवा तु तपति भगवान् भास्करः। दिवा सूर्यांशुभिः सर्वत्र सन्तप्तता भवति रात्रौ च चन्द्रांशुभिः शीतलता वितीर्यते। शरीराणि चानभ्यस्तानि जनाश्चा-सावधानाः, अतः वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः तप्तानामाचितं पित्तं प्रायः शरदं कुप्यति। तेन हि पित्तप्रकोपजाः विकाराः प्रादुर्भवन्ति। अत एवायुर्वेदोक्तं शरद्विधिमाचरेत्।**

शरत् में तन्द्रा रहितचन्द्रमा हंस के समान सुशोभित होता है आकाशतल जल के समान तथा विमल तारे कुमुद (सफेद कमल) के समान सुशोभित होते हैं। लेकिन यह सब कुछ शरद् ऋतु के शुक्ला पक्ष की रात्रि में ही होता है, दिन में तो भगवान् भास्कर (सूर्य) तपते हैं। दिन में सूर्य की किरणों से सर्वत्र सन्तप्तता होती है और रात्रि में चन्द्रमा की किरणों से शीतलता वितरित होती है। शरीर (इस तरह के वातावरण के) अनभ्यस्त होते हैं तथा लोग सावधान नहीं होते। अतः वर्षा के शीत के अभ्यस्त अङ्गों वाले व्यक्तियों के सहसा ही सूर्य की किरणों से तप्त उन व्यक्तियों में (वर्षा के काल के स्वभाव से) सञ्चित पित्त प्रायः शरद् ऋतु में प्रकुपित होता है। इस से पित्तप्रकोपजन्य विकार होते हैं। इसलिए आयुर्वेदोक्त शरद् ऋतुचर्या का आचरण करना चाहिए।

**कालेऽस्मिन् मधुरं शीतं लघु सतिक्तकं पित्तप्रशमनमन्नयानं सुप्रकाङ्क्षितैः जनैः मात्रया सेव्यम्। धराधरात्यये विशेषेणातपस्य वर्जनं कार्यम्। क्षारं दधि दिवास्वप्नं वसां तलं प्राग्वातं चात्र वर्जयेत्। रात्रौ मुक्ताकाशे चन्द्रांशुशीतले स्थले निद्रां न भजेत्। न केवलं शुक्लपक्षीये शरद्यपितु कृष्णयपक्षीयेऽप्येतत्सर्वमनुसरणीयम्। कालेऽस्मिन् निर्दोषस्य सुशुद्धस्य जलस्य सेवनं करणीयम्। शीतलवीर्यप्रधानं मधुरं सन्तर्पणं द्रवात्मकं सेवनीयम्। शाकेषु पटोलालाबुकोशातकी-कूष्माण्डहरितमेथिकेत्यादीनां प्रयोगः विशेषेण करणीयः, मुद्गयूषश्च पथ्य एव। फलानि मधुराणि पित्तप्रशमनानि च सेवनीयानि, विशेषेण तु द्राक्षा-खर्जूर-दाडिमामलक-परूषक-फल्गु-नारिकेल-शृङ्गाटक-पद्मवीजैरण्ड-कर्कटी सीताफलादीनां सेवनं सुखदं भवति। नारिकेलोदकस्य सेवनं विशेषेण करणीयम्।**

इस समय मधुर, शीत, लघु और तिक्त रस वाले पित्त का प्रशमन करने वाले अन्नपान का सेवन अच्छी प्रकार से आकाङ्क्षा किए गए व्यक्तियों के द्वारा करना चाहिए। शरद, दही, दिन में शयन, वसा, तैल एवं पूर्व की हवा ये सब इस ऋतु में वर्जित है। रात्रि में खुले आकाश में चन्द्रमा की किरणों से शीतल स्थल में नहीं सोना चाहिए। यह सब शुक्लपक्षीय शरद् ऋतु में ही नहीं, अपितु कृष्णपक्षीय शरद्ऋतु में भी करना चाहिए। इस समय दोषरहित शुद्ध जल का सेवन करना चाहिए। शाक में पालक, लौकी, तुरई, कद्दू, हरी मेथी इत्यादि का प्रयोग विशेष रूप से करना चाहिए, मूँग का यूष (दाल का पानी) पथ्य ही होता है। मधुर रसवाले तथा पित्त का प्रशमन करने वाले फलों का सेवन करना चाहिए। विशेष रूप से तो मुनक्का दाख (या अंगूर), पिण्ड खर्जूर, दाडिम, आमलक, फालसा, अंजीर, नारियल (पानी वाला), सिंघाडा, कमल के बीज (कमलगट्टा), पपीता एवं सीताफल आदि फलों का सेवन सुख देने वाला होता है। नारियल के पानी का सेवन विशेष रूप से करना चाहिए।

**शरद्यायुर्वेदचिकित्सकस्य परामर्शेन महा-तिक्तस्य सर्पिषः पञ्चतिक्तस्य वा सिद्धस्य सर्पिषः पानं पयसा सह केवलं वा करणीयम्। तेल पित्ताप्रशान्तौ विरेकः**

**करणीयः। अथवाऽच्छस्य सर्पिषः पानं 10-15 ग्राम मात्रायां पयसा सह सप्तदिनानि यावत् कृत्वा पञ्चदिवसपर्यन्तं मञ्जिष्ठादिचूर्णं रात्रौ ग्रामत्रयपरिमितं सेवनीयम् वर्तते। तेन हि सामान्यं विबन्धनाशनं पित्तरेचनञ्च भवति। ये हि विबन्धग्रस्ताः पित्तपीडिताः वा सन्ति तैस्त्वधिककालपर्यन्त-मपि सेवनीयं वर्तते मञ्जिष्ठादिचूर्णम्। किन्त्वस्य सेवनं विरम्य विरम्यैव विना च मलोत्सर्ग एव न जायते। शरदि ज्वरोत्पत्तिः कफानुबन्धी कासोऽतीसारश्च जायतेऽतः तेषां शीघ्रं निवारणं चिकित्सकस्य परामर्शेन करणीयम्।**

शरद् ऋतु में आयुर्वेद-चिकित्सक के परामर्श से महातिक्तघृत का या पञ्चतिक्तघृत जो कि (दोनों ही) औषध से सिद्ध होते हैं, उनका पान दूध के साथ अथवा केवल अकेले का ही करना चाहिए। उससे पित्त के शान्त नहीं होने पर विरेचन कर्म करना चाहिए। यह कर्म आयुर्वेद-चिकित्सक ही करवा सकता है। अथवा बिना सिद्ध किए गए केवल सामान्य घृत को सात दिन तक दूध के साथ (उचित मात्रा में) दश या पन्द्रह ग्राम की मात्रा में पी कर पाँच दिन तक मञ्जिष्ठादिचूर्ण को 3 ग्राम की मात्रा में रात में लेना चाहिए। इस से सामान्य विबन्ध (कब्ज) दूर होता है और पित्त का रेचन होता है। जो विबन्धग्रस्त हैं अथवा पित्तदोष से पीडित हैं (इस दोष की अधिकता वाले हैं) उन्हें तो अधिक समय तक भी मञ्जिष्ठादिचूर्ण का सेवन करना चाहिए। लेकिन इसका सेवन बीच-बीच में छोड़-छोड़ कर करना चाहिए। अन्यथा आँतों में रूक्षता हो जाती है और इस के बिना मलोत्सर्ग ही नहीं होता है। शरद् ऋतु में ज्वर एवं कफ के अनुबन्धवाला कास और अतीसार होता है अतः चिकित्सक के परामर्श से उनका शीघ्र निवारण करना चाहिए।

**अत्र केचिद्योगाः प्रस्तूयन्ते। एतेषां प्रयोगः स्वस्थैरेव करणीयः, रुग्णानां कृते तु चिकित्सकेन विहित एवोपचारः सुखदः निरापदश्च भवति। तिक्तकाः कषायाः-**

**- कलिङ्गकाः, पटोलस्य पत्राणि, कटुरोहिणी, गुडूची सारिवा मुस्तञ्चैतानिद्रव्याणि सममात्रायां गृहीत्वा कषायः करणीयः सेवनीयश्च।**

**- निम्बं, पटोलपत्राणि, मृद्वीकां, त्रिफलां, किराततिक्तकं, गुडूचीञ्च गृहीत्वा क्वाथो विधेयः सेवनीयश्च।**

**- गूडूचीमामलकं मुस्तं विश्वभेषू कटुरोहिणीपूच गृहीत्वा क्वाथो विधेयः सेवनीयश्च।**

**- रक्तचन्दनं मुस्तं सारिवां कटुरोहिणीं पाठां वत्सकमारग्वधञ्च गृहीत्वा क्वाशः करणीयः सेवनीयश्च।**

**- वासां गुडूचीं यवासकं मधुयष्टीं पिप्पलीं मृद्वीकां नीलोत्पलञ्च सममात्रायां गृहीत्वा विनिर्मितः क्राथः देयः।**

यहाँ कुछ योग प्रस्तुत किए जा रहे हैं। इनका प्रयोग स्वस्थ व्यक्तियों के द्वारा ही करना चाहिए। रुग्ण व्यक्तियों के लिए तो चिकित्सक के द्वारा किया गया उपचार ही सुखद और निरापद होता है।

**तिक्त-क्वाथ (कडुए काढे)**

- इन्द्रजौ परवल के पत्ते, कुटकी, गिलोय, सारिवा और नागरमोथा ये द्रव्य समान मात्रा में लेकर इनका काढा बनाना चाहिए और सेवन करना चाहिए।

- नीम की छाल, परवल के पत्ते, मुनक्का, त्रिफला, चिरायता और गिलोय लेकर काढा बनाना चाहिए और सेवन करना चाहिए।

- गिलोय, आँवला, नागरमोथा, सोंठ और कुटकी का काढा बनाना चाहिए और सेवन करना चाहिए।

- रक्त चन्दन, नागरमोथा, सारिवा, कुटकी, पाठा, इन्द्रजौ और अमलतास लेकर क्वाथ बना कर सेवन करना चाहिए।

- अडूसा, गिलोय, जवासा, मुलहठी, पिप्पली, मुनक्का और नीलोफर को समान मात्रा में लेकर बनाया गया क्वाथ देना चाहिए।

**अन्ये शरद्युपयुक्ताः योगाः-**

**- खर्जूरमृद्वीकामधूकपरूषकैः श्रृतशीतं जलं सशर्करं**

**पिपासवे दद्यात्।**

**– अटरूषकमृद्वीकापथ्याक्वाथः सशर्करः मधुमिश्रः श्वासकासज्वरनिबर्हणो भवति।**

**– सुपिष्टैरार्द्रैः शृङ्गाटकैः सह द्राक्षाखर्जूराणां पिष्टिं जले सम्मिश्र्य यथेष्टं मधु संयुक्तं कृत्वा पिबेत्। अनेन पित्तशमनं भवति तृप्तिश्च जायते।**

**– आरग्वधफलमज्जां ग्रामत्रयपरिभितां गृहीत्वां तावन्मात्राणां द्राक्षाफलानां निर्बीजात्मकानां पिष्टिंव, तत्र संयोज्य सुपक्वस्यैकस्य च निम्बुकस्य रसं जलञ्चक्ष तत्र सम्यग् विमिश्र्य पातव्यम्। सुखविरेचनं तृप्तिकरञ्चैतज्जलम्।**

**– द्राक्षामलकबिल्वानि पिप्पल्यश्चन्दनं मुस्तं तामलकी कण्टकारी च सर्वाण्येतानि द्रव्याणि गृहीत्वा क्वाथो विधेयः। अनेन ज्वरकासातीसाराणां निवृत्तिर्भवति। शरदि तृप्तिकारको ह्येषः योगः।**

**– शटी पुष्करमूलं व्याघ्री गुडूची नागरं वत्सकं देवदारू शृङ्गी किरातं कटुरोहिणी चन्दनं वासा पिप्पली मृद्वीका भार्गी पटोलपत्राणिसारिवाऽतिविषा बिल्वानि मुस्तमामलकं चैषः वर्गः श्वासकासज्वरापहः पित्तनिबर्हणश्च भवति। वर्गादस्मात् त्रयाणां पञ्चानां षण्णां वा द्रव्याणां ग्रहणं कृत्वा क्वाथो विधेयः।स्वस्थेषु रुग्णेषु चातीव हितकारक एषः क्वाथः शरदि विशेषेण सुखदो भवति।**

**सर्वेषां क्वाथयोगानां मात्रा सम्मिलितरूपेण विंशतिग्रामपरिमिता भवति, अस्यां मात्रायां गृहीतस्य क्वाथयोगस्य चतुःशतमिलि लीटर परिमिते जले क्षेपणं कृत्वा चतुर्थांशावशिष्टः क्वाथोऽग्निभाध्यमेन करणीयः।**

**शरद् ऋतु में उपयुक्त अन्य योग–**

– पिण्डखर्जूर, मुनक्का, महुआ और फालसा इन को मिल कर उबाल कर ठण्डा किया गया जल प्यासे व्यक्ति को देना चाहिए।

– अडूसा, मुनक्का और हरड़ का काढा बनाकर मिश्री एवं शहद मिलाकर सेवन करने से यह श्वास, कास और ज्वर को नष्ट करने वाला होता है।

– अच्छी प्रकार से पीसी हुई अदरक और सिंघाडों के साथ मुनक्का और पिण्ड खर्जूर की पिष्टि जल में मिलाकर पर्याप्त मधु मिलाकर पीना चाहिए। इस से पित्त का शमन होता है और तृप्ति होती है।

– अमलतास की फलमज्जा तीन ग्राम की मात्रा में लेकर इतनी ही मात्रा में बीजरहित मुनक्का की पिष्टि (चटनी) इस में मिलाकर एक नींबू का रस और अच्छी प्रकार से इस में जल मिलाकर पीना चाहिए। यह सुखपूर्वक पेट साफ करता है और तृप्ति करने वाला होता है।

– मुनक्का, ऑवला, बेलगिरी, पीपल, चन्दन, नागरमोथा, भूमि ऑवला और कटेरी इन सब को लेकर क्वाथ बनाना चाहिए। इस से ज्वर, कास और अतीसार की निवृत्ति होती है। शरद् ऋतु में यह योग तृप्तिकारक होता है।

– कचूर, पुष्करमूल, कटेरी, गिलोय, सोंठ, इन्द्र जौ, देवदारू, काकडासिंगी, चिरायता, कुटकी, चन्दन, अडूसा, पीपल, मुनक्का, भार्गी, पटोलपत्र, सारिका, अतीस, बिल्व, मोथा और ऑवला यह वर्ग श्वास–कास और ज्वर को दूर करने वाला तथा पित्त को नष्ट करने वाला होता है। इस वर्ग से तीन, पाँच, छः द्रव्यों को लेकर क्वाथ बनाना चाहिए। स्वस्थ व्यक्तियों और रूग्ण व्यक्तियों में अत्यन्त हितकारक यह क्वाथ शरद् ऋतु में विशेषरूप से सुख देने वाला होता है।

सभी क्वाथयोगों की मात्रा सम्मिलित रूप से 20 ग्राम की होती है। एक बार में सभी मिले हुए द्रव्य 20 ग्राम होने चाहिए।, इस मात्रा में लिए गए क्वाथयोग को 400 मि.लि. पानी में डालकर चतुर्थांशावशिष्ट क्वाथ अग्नि पर पका कर बनाना चाहिए।

८0, सेनापति हाउस के पीछे
प्रेमनगर, झोटवाड़ा, जयपुर (राज.)

# निदेशालयः, संस्कृत–शिक्षा, राजस्थानम्, जयपुरम्

(द्वितीयतलम्, ब्लॉकसंख्या 06, शिक्षासंकुलः, जवाहरलालनेहरुमार्गः, जयपुरम्–302015)

☎ 0141-2704357-58


## नवम्बरमासः, 2015

| रविवासरः | 1 | 8 | 15 | 22 | 29 |
|---|---|---|---|---|---|
| सोमवासरः | 2 | 9 | 16 | 23 | 30 |
| मंगलवासरः | 3 | 10 | 17 | 24 | |
| बुधवासरः | 4 | 11 | 18 | 25 | |
| गुरुवासरः | 5 | 12 | 19 | 26 | |
| शुक्रवासरः | 6 | 13 | 20 | 27 | |
| शनिवासरः | 7 | 14 | 21 | 28 | |

**कार्यदिवसाः** 12　**रविवासराः** 05　**अवकाशाः** 13　**उत्सवाः** 04

**2 – 3 नवम्बर** राज्यस्तरीयशैक्षिकसम्मेलनम् (शिक्षकाणां छात्राणां कृते च अवकाशः)।

**4 – 15 नवम्बर** मध्यावधि अवकाशः एज्युकेशनल वॉलिन्टियर्स (ईवीएस) इत्यस्य सप्तदिवसीयप्रशिक्षणम् (एस.एस.द्वारा)।

**11 नवम्बर** दीपावली (अवकाशः), राष्ट्रिय–शिक्षा–दिवसः(उत्सवः)।

**12 नवम्बर** गोवर्धनपूजा (अवकाशः)।

**13 नवम्बर** यमद्वितीया (भैयादूज) – अवकाशः।

**14 नवम्बर** बालदिवसः (उत्सवः)।

**19–23 नवम्बर** विशेष–आवश्यकतायुक्तबालकानां / बालिकानां कृते अङ्गोपकरणवितरणम्।

**19–25 नवम्बर** कौमी–एकता–सप्ताहस्य आयोजनम्।

**22 नवम्बर** एन.एम.एम.एस. परीक्षा–2016 इत्यस्य आयोजनम्।

**23 नवम्बर** कालिदास–जयन्ती (उत्सवः)।

**23–25 नवम्बर** के.जी.बी.वी. एवं मेवात–बालिका–आवासीयविद्यालयेषु अवशिष्ट–आधारभूतसामग्रीणां, पूरक–टी.एल.एम. इत्यस्य, स्टेशनरी एवं अन्य–शैक्षिकसामग्रीणां च वितरणम् (एस.एस.ए. द्वारा)।

**25 नवम्बर** गुरुनानक–जयन्ती (अवकाशः उत्सवः च)।

**26–08 दिसम्बर** अर्द्धवार्षिक–परीक्षा (सर्वासां कक्षाणाम्)।

**30 नवम्बर** विद्यालय–सुविधा–अनुदानस्य एवं जीर्णोद्धार–संरक्षण–अनुदानस्य उपयोगिता–प्रमाणपत्राणां प्रेषणम् (प्राथमिक एवं उच्च–प्राथमिकस्तरे)।

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**

**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,